**SRIRANGAM SRIMAD ANDAVAN ASHRAMAM**

श्रीमच्छ्रीवास योगीश्वर  मुनि करुणालब्ध वेदान्त युग्मं
श्रीमत् वेदान्त रामानुज गुरुपदयोरर्पित स्वात्मभारम्।
श्रीमच्छ्रुत्यन्त रामानुज यति नृपते: प्राप्त मोक्षाश्रमं  तं
श्रीमच्छ्रीवास रामानुज मुनिमपरं संश्रये ज्ञानवार्द्धिम्।।




ஸ்ரீமத் ஸ்ரீநிவாஸ ராமானுஜ மஹாதேசிகன் (ஸ்ரீமத் மைசூராண்டவன்)

# श्रीमत् मैसूराण्डवन्

विरचित

# स्तोत्र रत्नावली

**Anugraham**



ஸ்ரீமத் ஸ்ரீவராஹ மஹாதேசிகன்
ஸ்ரீமுஷ்ணம் சின்னாண்டவன்

**Pitadhipathi Srimad Andavan SriVaraha MahaDesikan**

© Srirangam Srimad Andavan Ashramam

Document redesigned and republished using **Google Translate** and **TT28 Publisher** **@aradhanam.org**

Sri

Srimathe Rangaramanuja Mahadesikaya Namaha
Srimathe Srinivasa Ramanuja Mahadesikaya Namaha
Srimathe Vedantha Ramanuja Mahadesikaya Namaha
Srimathe Ranganatha Mahadesikaya Namaha

Srimathe Srinivasa Mahadeiskaya Namaha
Srimathe Nigamantha Mahadesikaya Namaha
Srimathe Bhghawathe Bashyakaraya Mahadesikaya Namaha
Srimathe Ranganatha Divyamani Padukabyam Namaha

SRIRANGAM
SRIMAD ANDAVAN ASHRAMAM

H.Qrs. Melur Road, Srirangam, Tiruchirappalli - 620 006
Phone : 0431-2432379

Camp : B'lore
Date : 17/8/2009

ஸ்ரீமுகம்

மைசூர் ஆண்டவன் என்ற ஆசார்யன்
வேத வேதார்த்த வேதாந்தங்களில் வல்லவர்,
ஸாஹித்ய-வ்யாகரண-மீமாம்ஸையில்
நல்ல ஞானமுள்ளவர், சிறந்த ஆசுகவி,
கன்னடம், தமிழ், ஹிந்தி மொழிகளிலும்
புலமை நிறைந்தவர், அவற்றில் பல நூல்களை
யாத்துள்ளார், பலவற்றை மொழிபெயர்த்துள்ளார்,
சாந்தர், ஆசாரசீலர், எல்லாவற்றுக்கும் மேலாக
ஆத்ம குணமுள்ளவர், சிறந்த நல்லாசிரியர்,
பகைவர்களிடத்தும் அருட்குணம் உடையவர்.
சுருங்கச் சொன்னால் இம்மாதிரியான மனிதரைப்
பார்ப்பது அரிது. மேலும் இந்த ஆச்ரமத்தின்
ஸ்ரீகார்யமாக இருந்து நற்பணிகள் பலவற்றைச்
செய்துள்ளார். இந்த அவருடைய ஶதமான
மஹோத்ஸவ ஸமயத்தில் அவரை மானஸீகமாக
தெண்டன் ஸமர்ப்பிப்பது எல்லாருக்குமே நன்மை
பயக்கும் என்று கூறி நாராயணானுஸந்தி செய்கிறேன்
நாராயண! நாராயண!! நாராயண

இவ்
श्रीरङ्ग.रामानुजयति

# विषयसूचिका

श्री आचार्यवैभवशतकम्............3
दोम्बविल्लि श्रीनिवासपञ्चश्लोकी............27
श्री महालक्ष्मीस्तुतिः............29
श्रीमहालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः............50
श्री नाथमुनिस्तुतिः............52
श्रीमन्निगमान्तमहादेशिकवैभवशतकम्............59
श्री रामानुजपञ्चाशत्............82
श्रीनिवासाष्टोत्तरशतनामस्तुतिः............93
श्रीनिवासप्रपदनस्तुतिः............96
श्री वेङ्कटेशस्तुतिः............97
श्री यामुनमुनिस्तुतिः............104
आचार्य प्रभाव दशकम्............111
திருநாள்பாட்டு............113
மைசூர் ஆண்டவன் மங்களம்............114

# श्री आचार्यवैभवशतकम्

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

## श्रीरङ्गनाथः

कस्तूरीकलितोर्ध्वपुण्ड्रतिलक श्रुत्यन्तलोलेक्षण
मुग्धस्मेरमनोहराधर हरे मुक्ताकिरीटोज्ज्वल ।
पश्यन्मानसपश्यतोहररुचे श्रीरङ्गनेत्रीपते
श्रीमद्वेदवतंसलक्ष्मणगुरुः दीव्यात् समानां शतम्॥ [१]

कासारभूत-महदाह्वय भक्तिसार-
भक्ताङ्घ्रिरेणु-कुलशेखर-पाण-मुख्यैः।
गोदा-शठारि-कलिवैरिभिरीड्यमान
श्रीरङ्गराज गुरुरत्र शतं समास्स्तात्॥ [२]

सत्यसङ्कल्पकल्पद्रुः श्रितेच्छाफलदो महान् ।
श्रुत्यन्तलक्ष्मणगुरुः आस्तां अत्र शतं समाः॥ [३]

सर्वश्रेयःप्रदः श्रीमान् सदाचार्यामरद्रमः ।
आस्तिका भूसुरास्तुष्टा निषेवन्तेऽवतात् श्रितान्॥ [४]

कल्पद्रुः स्वाश्रितान् सर्वान् फलदानेन रक्षति ।
फलाऽऽदानात् श्रितास्सर्वे तोषयेयुः फलप्रदान्॥ [५]

केवलं फलदृष्ट्यैव न कुर्यात् गुरुसेवनम् ।
कर्तव्यदृष्टयाऽऽ चरितं दद्यादेवाऽतुलं फलम्॥ [६]

सदाचार्यस्य विषये त्वरेयुर्जागरूकतः ।
स्वस्वकर्तव्यतादृष्ट्या ये स्युस्ते यान्ति सत्फलम्॥ [७]

आचार्या अस्मदीयाः श्रितसकलहृदावासिनस्सर्वदास्स्युः
अत्यन्तोदारशीलाः इति हि सकलहृत्स्वादृतास्सन्ति हृष्टाः ।
लोकेऽस्मिन् वत्सराणां शतं अधिकमितो देववत् स्युर्ह्युपास्याः
एवं चेदेव देवाः सकलसुहृदयामोदिताः शोभितास्स्युः॥ [८]

लक्ष्मीकेळिगृहायमाणविलसन्नेत्राम्बुजो वाग्वधू-
सम्यङ्नर्तमन्दिरायितमुखो धर्मैकतानाशयः ।
सङ्ख्यावत्सुजनाभिरक्षणभुजो हंसाऽवतंसस्स्वयं
देवोऽसावसमस्समः समवतात् मोदात्समानां शतम्॥ [९]

## श्रीनिवासः

भूयो भूयो नमामः प्रणुम इह निधिं श्रेयसां श्रीनिवासं
प्रायो ध्येयोऽखिलैर्यो निखिलकलिमलोद्धूतयेऽलं धरित्र्याम् ।
रायो लक्ष्मीनिवासात् हृदयसरसिजे यस्य वर्षन्ति हर्षात्
सोऽयं हर्षात् प्रवर्षत्वतिमहितयतेः आयुरंशे शतर्द्धिम्॥ [१०]

श्रीशेषाद्रिनिवासरञ्जितरमावासाधिवास प्रभो
कोऽशक्योऽधिकभूम्न एव भुवि नाम्नोऽर्थेषु दातुं हरे ।
धाम्नस्ते श्रिय उर्वरेश करुणासीम्नस्सुदाम्नः प्रिय
गोपालं सफलं यदीच्छसि गुरोः पूर्णायुषं कारय॥ [११]

श्रीवेण्वञ्चितगोपजुष्टमहिमन् श्रीवास भक्तेष्टद
वृत्रार्याद्यतिदुर्लभं पदमवापात्राशु भक्ताग्रणीः ।
गुर्वाशावशतोऽद्य ते करुणया याचे फलं देहि मे
श्रीमद्वेदवतंसलक्ष्मणगुरुः भूयात् शतायुर्ध्रुवम् ॥ [१२]

## श्रीकाञ्चीपुरविराजमानदेवाः श्रीदेवाधिराजः

दीव्यन् सत्यव्रतोर्व्यां करिगिरिशिखरे पुण्यकोटीविमाने
भूमन् देवाधिराज श्रितवरद महादेव्यधीशान देव ।
नागेन्द्राऽनन्तसाक्षात्कृत दुरितहरानन्ततीराधिवासिन्
श्रीमद्वेदान्तरामानुजयतिप इहाऽऽराजतादाशताब्दम् ॥ [१३]

## यथोक्तकारी

भोगीन्द्रतल्प भगवन् श्रितकल्पशाखिन्
श्रीकोमळाप्रिय रमेश यथोक्तकारिन् ।
कासारकल्यरिमुनिस्तुत भक्तिसार-
सङ्कीर्तिताऽस्तु गुरुरेष मुदा शतायुः ॥ [१४]

भोगीशानशयान संश्रितमहाभक्तैककल्पद्रु
लक्ष्मीनायक कोमळाप्रिय यथैवोक्तं तथाकारक ।
कासाराङ्कितकल्यरातिमुनिराट्श्रीभक्तिसारैर्नुत
वेदान्तादिमलक्ष्मणाख्यमुनिराट् भातात् शताब्दं भुवि ॥ [१५]

श्रीमन् अष्टभुजादिकेशव हरे पद्मावतीवल्लभ
व्योमाकारविमानमण्डित करिप्रत्यक्ष कारुण्यवन् ।
नागाधीशसरोविहार भगवन् सारप्रदानादर
कल्यर्युक्तिनुत स्युराशतसमं वेदान्तरामानुजाः ॥ [१६]

## वेळुक्कै

स्वामिन् मुकुन्द यदुनन्दन भार्गवीश
कार्तस्वरोत्तमविमानग कल्यरीड्य ।
भृग्वक्षिगोचर कदम्बसरोविहारिन्
वेदान्तलक्ष्मणगुरुर्लसतात् शताब्दम् ॥ [१७]

## दीपप्रकाशः

वाणीप्रत्यक्ष वाणीसर उपवसते भावितात्मप्रकाश
वासिन् श्रीकृद्विमाने मरकतमणिवल्लीश दीप्रप्रकाश ।
श्रीवेदान्तार्यसूक्तिप्रकटितमहिमावास तेजोविशेष
श्रीमद्वेदान्तरामानुजगुरुरिह नो दीव्यतात् आशताब्दम् ॥ [१८]

## त्रिविक्रमः

त्रिविक्रम नतार्तिहन् अमृतवल्लिकोपघ्न भोः
रमाकरविमानग प्रथितनागतीर्थाञ्चित ।
फणाधरवराक्षिगोचर हरे कलिद्विण्णुत
समास्स्युरिह नश्शतं निगममौळिरामानुजाः ॥ [१९]

## नीरहम् - जगदीशस्वामी

श्रीमन् धराधिप धरेशविमानयान
  भूमण्डलाप्रिय जगद्विदितात्मभाव ।
लोकाभिराम कलिवैरिनुत प्रभो नः
  वेदान्तलक्ष्मणगुरुः शरदां शतं स्तात् ॥ [२०]

## कारहम्

पद्मामणीश करुणाकर सत्यकाम
  गाग्र्याक्षिगोचर समस्तसमुद्दिधीर्षो ।
स्वामिन् कलिद्विडभिकीर्तित चक्रपाणे
  वेदान्तलक्ष्मणगुरुः शरदां शतं स्तात् ॥ [२१]

## कार्वनम् कल्वन्

कळ्वाभिधेश कमलेश महादयाळो
  शौरीतटाकतटलोल शिवाभिलक्ष्य ।
श्रीकल्यरातिमुनिराटण्णुत वीर विष्णो
  वेदान्तलक्ष्मणमुनिः जयतात् शताब्दान् ॥ [२२]

## प्रवालवर्णः

प्रवाळवल्लीरमण प्रवाळवर्ण
  प्रवाळाख्यविमानपूर्ण ।
श्रीकल्यरातिस्तुत चक्रतीर्थ
  समाश्शतं योगिवरान् समक्षे ॥ [२३]

## पाडहम् - पाण्डवदूतन्

भद्राभिख्यविमानवन् प्रभुमणे श्रीसत्यभामापते
भूतेशेन कलिद्विषा प्रणुत भोः श्रीभक्तिसारस्तुत ।
हारीतेक्षित रुक्मिणीश भगवन् श्रीमन् महाख्यातिमन्
श्रीमद्वेदवतंसलक्ष्मणमुनिः भात्वाशताब्दं मुदा ॥ [२४]

## पुण्डरीकाक्षः

ज्योत्स्नानन्दाभिपूर्णाऽनितरसहकृदानन्दिनीप्रेमधामन्
पुंसूक्त्याख्ये विमाने विरचितवसते पुण्डरीकाक्ष भूमन् ।
श्रीमन् एकाम्रनाथप्रिय सुगुणनिधे कल्यरातीडितात्मन्
बाभान्त्वानन्दवर्षि श्रुतिशिखरमुखा लक्ष्मणा आशताब्दम् ॥ [२५]

## आदिवराहः

श्रीमन् आदिवराह वामनविमानस्थाऽभयाम्बापते
काञ्च्यां आश्रमवाञ्छयाश्रितनिधे भक्तैकसंलक्षित ।
नित्यां पुष्करिणीं उपाश्रितहरे श्रीकल्यरातीडित
श्रीमद्वेदवतंसलक्ष्मणगुरुः दीव्यात् समानां शतम् ॥ [२६]

## वैकुण्ठनाथः

वैकुण्ठनाथ पुरुषोत्तम वासुदेव
वैकुण्ठवल्ल्यधिप संश्रितसर्वरक्षिन् ।
कारुण्यवन् कुमुदनामविमानवासिन्
वेदान्तलक्ष्मणगुरुः जयतात् शताब्दान् ॥ [२७]

## तिरुवहीन्द्रपुरं - श्रीदेवनायकः

श्रीदेवनायक हरे शशितार्थ्यदृष्ट
भोगीन्द्रतीर्थवसते गरुडापगेश ।
वैकुण्ठनेत्र्यधिपते गुरुराट् शताब्दान्
त्रय्यन्तलक्ष्मणमुनिः व्यरुगेव भातात् ॥ [२८]

## मधुरै - गोवर्धनेशः

श्रीमान् गोवर्धनेश प्रणतजनहृदानन्ददायिन् मुरारे
गोरक्षिन् सत्यभामासहचर यमुनावाहिनीतीरलोल ।
स्वामिन् गोदाशठारिस्तुत मधुमधुरावास सद्धर्मपाल
श्रीरङ्गाधीशसेवी श्रुतिशिखरमहालक्ष्मणोऽस्त्वाशताब्दम् ॥ [२९]

## श्रीमदहोबिलहरीशानः

लक्ष्मीसंश्लिष्ट शिष्टोद्धरणसुकृतिमन् केसरिन् आर्तिहारिन्
श्रीमन् हैरण्यगर्भोद्विदळन नृहरे शिष्टरक्षैकदीक्ष ।
प्रह्लादाह्लादकारिन् कलिरिपुविनुत श्रीशठारीष्टतुष्ट
श्रीमद्वेदान्तरामानुजगुरुयतिराट् आशताब्दं भुवीन्धाम् ॥ [३०]

## नवमोहनकृष्णः गोवर्धनम्

श्रीमन् कवेरतनयातटराजमान
कृष्णराजपुरभासुर मानिवास ।
वेणूल्लसत्कर विधूतसमाश्रितार्ते
वेदान्तलक्ष्मणगुरुः शरदां शतं स्तात् ॥ [३१]

## गोकुलवृन्दावन - नवमोहनकृष्णः

श्रीमन् गोकुलपाल दिव्यमहिमन् श्रीसत्यभामाधव
नन्दानन्दन रुक्मिणीप्रिय हरे गोपाल भक्तेष्टद ।
गोदा-कल्यरि-विष्णुचित्तकुलमौल्युद्गीत हे मोहन
आम्नायान्तमुखात्तलक्ष्मणगुरुः दीव्यात् समा आशतम् ॥ [३२]

मेधाधारगुरुः धराधरसुराधारार्चितामोदकः
गोदासुन्दरसन्मनोहरसुधास्वादी सुधीमन्दिरः ।
योगीन्द्रः स्वपरानुकूलमतिवाक्कृत्यानुकूलाकृतिः
हर्षात् वर्षशतं लसत्विह गुरुर्वेदान्तरामानुजः ॥ [३३]

## नैमिशारण्यम् - देवराजः

नैमिशाटवीमहीश दिव्यकान्ततीर्थवन्
श्रीहरिप्रियासनाथ गोमतीधुनीप्रिय ।
व्यासयोगिभासुराऽवनीसुरार्चित प्रभो
वेदमौळिलक्ष्मणास्स्युराशतं समा इमे ॥ [३४]

## अयोध्या - श्रीरामः

श्रीमन् लोकाभिराम श्रितजनहृदयाराम रामाभिराम
सौजन्यावास भूमन् शुभगुणमहिमन् राम सम्पूर्णकाम ।
स्वामिन् आत्माश्रितेभ्यः शरणद सरयूवर्त्ययोध्याधिधाम
योगी वेदान्तरामानुजगुरुरिह संवत्सराणां शतं स्तात् ॥ [३५]

## देवप्रयाग - श्रीरामः

देवप्रयागपुरुषोत्तम पुण्डरीक-
वल्लीसनाथ भगवन् वहुपुण्यनामन् ।
श्रीविष्णुहृत्कलिरिपुस्तुत नीलमेघ
श्रुत्यन्तलक्ष्मणगुरुः शरदां शतं स्तात् ॥ [३६]

## श्री बदरीनारायणः

श्रीमन् मूलमनूक्तसर्वपुरुषार्थैकाश्रय श्रीनिधे
हैमक्ष्माधरमौळिलक्ष्यबदरीनारायणास्मन्निधे ।
श्रीमत्कल्यरिविष्णुचित्तविनुत श्रीभक्तकल्पद्रुम
श्रीमद्वेदवतंसलक्ष्मणगुरुः स्तादाशताब्दं भुवि ॥ [३७]

## सालग्राममूर्तिः

सालग्रामसमग्रवर्णजफलीभूतार्थसङ्क्षेपकृत्
सालग्रामनिवास नित्यविभव श्रीमूर्तिरूपिन् हरे ।
सर्वोपादृतमूर्तिवैभवनिधे श्रीविष्णुहृत्कल्यरि-
प्रोद्गीतश्रुतिमौलिलक्ष्मणगुरुः स्वास्तां समानां शतम् ॥ [३८]

## गोवर्धनः

क्षीराम्भोनिधितत्सुताप्रिय हरे श्रीविष्णुचित्संस्तुत
देवाष्टाङ्गविमानगाऽमृतसरोवासिन् कलिद्विण्णुत ।
श्रीभूनायक भक्तिसारकुलमौल्युद्गीत भक्तेष्टद
स्वामिन् श्रीश्श्रुतिमौळिलक्ष्मणगुरुः जीयात् समानां शतम् ॥ [३९]

## तिरुवळ्ळूर्-वीरराघवस्वामी

श्रीवीरराघव भुजङ्गशयन देव
हृत्तापनाशकसरस्तटवासलोल ।
भक्तार्तिहन कलिविरोधिमुनीन्द्रगीत
श्रुत्यन्तलक्ष्मणगुरुः लसतात् शतायुः ॥ [४०]

## परवासुदेवः

पूर्णात्मन् परवासुदेव भगवन् शेषाधिशायिन् दयिन्
प्रत्यक्षीकृतनित्यमुक्तक विभो लक्ष्मीमहीनायक ।
सम्पूर्णानुभवप्रदायक सरोमुन्यादिसर्वेडित
स्वामिन् श्रुत्यवतंसलक्ष्मणगुरुः जीयात् समानां शतम् ॥ [४१]

## घटिकाचलयोगनारसिंहः

भूमन् योगनृसिंह योगिसुमनस्सौगन्ध्यसम्मोदक
स्वामिन् मारुतिदृवप्रसन्न घटिकाद्रीशाऽमृताम्बप्रिय ।
श्रीमन् श्रीमहदाख्य-कल्यरिशठार्युद्गीतकीर्ते प्रभो
योगिश्रीश्रुतिमौळिलक्ष्मणगुरुः जीयात् समानां शतम् ॥ [४२]

## तिरुवल्लिक्केणि-पार्थसारथिः

श्रीमन् अर्जुनसारथे गुणनिधे श्रीरुक्मणीश प्रभो
आनन्दाख्यविमानभूषण दयाक्षीराम्बुधे ऽस्मन्निधे ।
रक्षिन् कल्यरि-भक्तिसार-महदाख्योद्गीत वेदप्रिय
स्वामी नः श्रुतिमौळिलक्ष्मणगुरुः दीव्यात् समानां शतम् ॥ [४३]

## तिरुनीर्मलै - नीलमेघप्पेरुमाळ्

स्वामिन् श्रीमणिकर्णिकाभिधसरोधोऽधोनिवासिन् हरे
श्रीभूताख्यमुनीड्य कल्यरिवचोगीतासु नस्सत्फल ।
योगिन् नीलघनाभिराम परमश्रेयोऽधिधामन् प्रभो
श्रीमन् वेदशिरा हि लक्ष्मणमुनिः दीव्यात् समानां शतम् ॥ [४४]

## तिरुनिन्नवूर - भक्तवत्सलन्

श्रीकल्यरात्यात्मज भक्तवत्सल
महोत्पलाख्यातविमानवासिन् ।
श्रीमत्प्रसूवल्लभ ते दयातः
स्ताल्लक्ष्मणो वेदशिराश्शतायुः ॥ [४५]

## तिरुविडवेन्दै - नित्यकल्याणस्वामी

श्रीमन् कोमलवल्लिकाप्रिय हरे कल्याणतीर्थप्रिय
कल्याणाख्यविमानपावनकर श्रीभूमिनीळाप्रिय ।
मार्कण्डेयमुनिप्रसन्न करुणामूर्ते प्रपन्नप्रिय
आचार्या विलसन्तु वत्सरशतं श्रुत्यन्तरामानुजाः ॥ [४६]

## तिरुक्कडल्मल्लै - महाबलिपुरम्

त्रनित्यक्षेशय नित्यभोगिशयन श्री-भूमि-नीळाप्रिय
व्योमाकारविमानपावन हरे भूतोदयक्ष्मापते ।
भूतर्षीडित भक्तिसार-कलिवैर्युद्गीत सर्वेक्षित
श्रीमद्वेदवतंसलक्ष्मणगुरुः प्रेन्धां समानां शतम् ॥ [४७]

## तिरुप्पुट्कुळि - विजयराघवन्

जटायुनयनोल्लसन् विजयराघव स्वस्तिकृत्
जटायुसर आवसन् विजयकोटिसंशोभित ।
हरे मरकतापते कलिरिपूक्तिसम्प्रीणित
लसेत् शततमा भुवि श्रुतिशिरो गुरुर्लक्ष्मणः ॥ [४८]

## तिरुक्कोवलूर - त्रिविक्रमः

श्रीमन् त्रिविक्रम हरे सुमगोपिकेश
श्रीकृष्णतीर्थगत गोपपुराधिराज ।
भूतादिसन्नुत मृकण्डुवलीन्द्रदृष्ट
श्रुत्यन्तलक्ष्मणगुरुः जयतात् शताब्दान् ॥ [४९]

## चित्रकूटं गोविन्दराजः

श्रीमन् गोविन्दराज श्रितवरद महाभोगिभोगेशयान
सन्मूर्ते पुण्डरीकाभिधवरदयितावल्लभ श्रीमहीश ।
स्थाणुप्रत्यक्ष कण्वेक्षित कलिरिपुसत्सूक्तिसंगीत देव
सत्यश्रीर्वेदमौळिः गुरुरिह लसतात् लक्ष्मणो ह्याशताब्दम् ॥ [५०]

## श्रीमुष्णं - भूवराहः

भूवराह लोकपाल भूमिभारनाशक
सत्पुराणसुप्रसिद्धदिव्यदेशपावन ।
साधुवर्गपोषक व्यसाधुवर्गशोषक
वेदमौळिलक्ष्मणाः समाश्शतं मुदाऽऽसताम् ॥ [५१]

## कुम्भघोण - शार्ङ्गपाणिः

श्रीमन् कोमळवल्ल्यधीश भगवन् श्रीशार्ङ्गपाणे हरे
उद्योगाभिधभोगितल्प महिमन् हैमं सरोऽधिष्ठित ।
गोदा-कल्यरि-विष्णुचित्त-शठजिद्गीत श्रितत्र प्रभो
श्रीमद्वेदवतंसलक्ष्मणगुरुः दीव्यात् समा आशतम् ॥ [५२]

विमाने प्रणतत्रेऽत्र वासिन् वैदिकनामनि ।
श्रितत्रातः श्रुतिशिरोलक्ष्मणास्स्युश्शतं समाः ॥ [५३]

## भारतराष्ट्रीय प्रधान महानगरनिवासदेवानुग्रप्रार्थना

सर्वे सर्वास्समा अत्र समा एव लसन्त्यहो ।
ईदृशा गुरवोऽत्रत्याः समेधन्तां शतं समाः ॥ [५४]

स्वीयश्रीजुष्टराष्ट्राऽ ऽ हितहितभरिते भारते राजधान्यां
दिल्ल्यां राराजमाने सुजनपरिचिते रामकृष्णेपुरेऽग्रये ।
श्रीमद्वेदान्तरामानुजयतितिलकौदार्यविद्योतकश्री-
वैकुण्ठागारमूर्ते जगदवनकृते स्युश्शताब्दा यतीशाः ॥ [५५]

## तिरुवालीनगरीस्थः - वयलाळिमणवालन्

श्रीमन् पश्चिमदिङ्मुखाऽमृतघटश्रीशाऽखिलेश प्रभो
प्रेष्ठाष्टाक्षरयुग्विमानवसते श्रीकल्यरिप्रेक्षित ।
वासिन् लाक्षणिपुष्करिण्युपतटे श्रीकर्दमालोकित
स्वामिन् वेदशिखादिलक्ष्मणगुरुः स्तादाशताब्दं मुदा ॥ [५६]

## श्रीरामविण्णगरं शीयाळि - ताडालन् स्वामी

श्रीमन् त्रिविक्रम हरे वरदाभिराम
सर्वार्थदाहृदयवल्लभ चक्रतीर्थिन् ।
भक्ताष्टकोणमुनिगोचर सिद्धमूर्ते
श्रीकल्यरे गुरुरिहास्तु शतं समा नः ॥ [५७]

## मणिमाडक्कोयिल् - नन्दाप्रदीपस्वामी

श्रीनारायण पुण्डरीकलतयाऽऽश्लिष्ट श्रिया मत्प्रिय
नन्दाप्रदीपरुचे गिरीशसरसीतीरे विहारिन् हरे ।
सर्वेश प्रणवाधिवास भगवन् श्रीकल्यरातीडित
श्रीमद्वेदवतंसलक्ष्मणगुरुः स्तादाशताब्दं सुखी ॥ [५८]

## श्रीवैकुण्ठविण्णगरं - वैकुण्ठस्वामी

भूमन् वैकुण्ठवल्लीविहरणरसिक श्रीसरस्तीरवासिन्
स्वामिन् वैकुण्ठनाथ प्रणतजनशरण्याऽत्र सर्वेष्टदायिन् ।
सत्येऽनन्ते विमाने सुरचितवसते भो उदङ्कर्षिदृष्ट
मोदात् वेदान्तरामानुजगुरुतिलको राजतादाशताब्दम् ॥ [५९]

## अरिमेयविण्णगरम् - विण्णगरप्पेरुमाळ्

लीलाकुम्भशिरोऽभिनेयतनुमन् पीयूषकुम्भोद्वह
स्वामिन् कल्यरिसूरिसूक्तिविनुत श्रीमन् उदङ्केक्षित ।
शिष्टातिप्रिय सर्वभक्तविनुतिप्रीत प्रदातोऽधिकम्
दीव्यात् श्रुत्यवतंसलक्ष्मणगुरुः मोदात् समानां शतम् ॥ [६०]

## तिरुमणिक्कूडम्

जगज्जनन्यधीश चन्द्रपुष्करिण्युपाश्रय
प्रसादनाभनामसद्विमानवास मापते ।
मणीन्द्रकूटनायक प्रभो कलिद्विडीड्य भोः
त्रयीशिरास्सलक्ष्मणो गुरुश्शतायुषी लसेत् ॥ [६१]

## तिरुवेळ्ळक्कुलम् - लक्ष्मीवल्लभः

लक्ष्मीवल्लभ तत्त्वबोधनविमानान्तस्स्थ नारायण
श्रीकृष्ण प्रणतैकरक्षणचण स्वामिन् दयालो हरे।
श्रीमन् शुभ्रवसुन्धरेश भगवन् श्रीकल्यरातिस्तुत
विश्वात्मन् श्रुतिमौळिलक्ष्मणगुरुः दीव्यात् समानां शतम् ॥ [६२]

## पार्थन्पल्ली - कमलापतिः

भक्ताभीष्टफलप्रदामरतरो कारुण्यमूर्ते हरे
सद्बन्धो कमलानिवास कमलाधीशान नारायण ।
तोयेशार्जुनसुप्रसन्न भगवन् शङ्खाख्यतीर्थप्रिय
कल्यर्यानुत लक्ष्मणः श्रुतिशिराः भातात् समानां शतम् ॥ [६३]

## तिरुक्कुरुङ्गुडि - श्यामलमूर्तिः

श्रीमन् श्यामल कोमलाङ्ग भगवन् प्रीतारविन्दाप्रिय
स्वामिन् गौतमगोचरोत्पलविमानाधिष्ठित श्रीपते ।
कल्याणाऽमृतवारिधे भृगुमनोऽभीष्टप्रदायिन् प्रभो
श्रीमत्कल्यरिसन्नुतैष गुरुराट् दीव्यात् शताब्दी सुखी ॥ [६४]

## तिरुक्कण्णपुरं - शौरिराजः

श्रीमन् कण्वमुनीन्द्रदृष्ट भगवन् श्रीशौरिराट् श्रीनिधे
गोदा-कल्यरि-विष्णुचित्त-शठजित्-सङ्कीर्तिताऽस्मन्निधे ।
नित्याभिख्यसरोविलास कुतुकिन् नित्योत्पलावास भोः
श्रीमद्वेदवतंसलक्ष्मणगुरुः दीव्यात् समा आशतम् ॥ [६५]

## तिरुक्कण्णमङ्गै - भक्तवत्सलः

भक्तेष्टप्रद भक्तवत्सल हरे देवाभिषेकोत्सुक
स्वामिन् उत्पलवास दर्शनसरोरोधोविहारप्रिय ।
रोमाख्यर्षिजलाधिदैवतकृतप्रत्यक्ष कारुण्यवन्
श्रीमत्कल्यरिसूरिसूक्तिविनुत प्रेन्धां शतायुर्गुरुः ॥ [६६]

## श्रीनन्दिपुरविण्णगरं - श्रीजगन्नाथन्

श्रीमन् चम्पकवल्लिकाप्रिय हरे नारायण श्रीपते
मन्दाराग्र्यविमानवास भगवन् स्वामिन् जगन्नायक ।
नन्दाख्यातसरोविहाररसिक श्रीनाथ नन्दिप्रिय
श्रीमत्कल्यरिसूरिसूक्तिविनुत प्रेक्षस्व योगीश्वरम् ॥ [६७]

## तिरुविण्णगरम् - ओप्पिलियप्पन्

लावण्यातिग देव भूधव वसन् विष्णो विमाने हरे
मार्कण्डेय-कवेरजा-खगपति-प्रत्यक्षमूर्ते विभो ।
गोदाऽभिष्टुत कल्यरीड्य शठजित्-वागीशवाणीनुत
श्रीमन्-आर्तिसरोविहार भगवन् दीव्यात् शतायुर्गुरुः ॥ [६८]

## पुळ्ळंभूतङ्कुडि - कोदण्डरामन्

रुक्माज्ञाप्रिय शेषतल्प भगवन् कोदण्डराम प्रभो
गार्धं तीर्थं अधिष्ठिताश्रितनिधे श्रीगृध्रराजेक्षित ।
दिव्ये शोभननाम्नि सद्गुणनिधे वासिन् विमाने हरे
श्रीमन् कल्यरिसूरिसूक्तिविनुत स्तात् आशतं योगिराट् ॥ [६९]

## तञ्जैमामणिक्कोयिल् - नीळमेघप्पेरुमाळ्

वेण्णारोधसि नीळमेघ भगवन् रक्ताम्बुजायाः पते
सौदर्याख्यविमानगामृतमयं तीर्थं यदावासितम् ।
कन्यापुष्करिणी च यद्विहृतये भूताख्ययोगिस्तुत
श्रीमन् कल्यरिसूरिवर्यविनुत स्तादेष दीर्घायुषा ॥ [७०]

## अप्पक्कुडत्तान् - तिरुप्पेर्नगरम्

इन्द्राद्रीश पराशरोपमनुदृग्भूतेन्द्रतीर्थप्रिय
स्वामिन् इन्द्रविमानवास भुजगाधीशानशायिन् हरे।
दैत्यारे कमलापते शठारिपु श्री विष्णुचीत्तस्तुत
श्रीमन् कल्यरिसूरिवर्यविनुत स्तात् आशतं योगिराट् ॥ [७१]

## अन्बिल् - भुजङ्गशायी

अन्बिलूम्य महोपकारक महाहीशानशायिन् प्रभो
रम्यश्रीश भवाब्धितारक विमानैकाश्रय श्रीनिधे ।
मण्डूकाख्यसरोविलोल भगवन् ब्रह्मादिसम्प्रेक्षित
श्रीमन् कल्यरिसूरिवर्यविनुत प्रेन्धां शतायुर्गुरुः ॥ [७२]

## उरैयूर् - दासलक्ष्मीः

कावेर्या निचुळापुरे तटभुवि श्रीरम्ब वारादिमे
कल्याणाख्यविमानभासिनि कलिध्वंसासिवाक्सन्नुते ।
कल्याणाभिधतीर्थपावनकरि श्रीरङ्गराजप्रिये
मातः श्रीरविवर्मराजवरदे स्तात् योगिराट् आशतम् ॥ [७३]

## तिरुवेळ्ळरै - पुण्डरीकाक्षः

श्वेताज्ञाक्ष सिताद्रिवास भगवत्यम्भोजदेवीपते
श्री-भू-तार्थ्य-मृकण्डु-सम्भवकृतप्रत्यक्षमूर्ते हरे ।
कौशं तीर्थमधिष्टितेश विमलाकारे विमाने स्थित
श्रीमन् कल्यरि-विष्णुचित्तविनुत स्तात् आशतं योगिराट् ॥ [७४]

## तिरुमालिरुंशोलै - सुन्दरबाहुः

स्वामिन् सुन्दरवल्लिकाश्रयमहाशाखिन् वृषाद्रिप्रभो
राजीवाक्ष पुराण नूपुरनदीरोधोविहारिन् हरे ।
गोदाविष्णुमनश्शठारिकलिजित्सूर्युक्तिसङ्कीर्तित
श्रीशानन्यशरण्य सुन्दरभुज स्तादाशतं योगिराट् ॥ [७५]

## तिरुमेय्यम् - श्रीसत्यगिरिनाथन्

श्रीमन् सत्यगिरीश पावन भवोद्धर्त्रीश सर्वेश्वर
श्री सत्यप्रिय सत्यतीर्थवसते सर्वार्थदायिन् हरे।
दिव्याकार कदम्बवासरसिक श्रुत्येकसंवेद्य भोः
देवाऽप्राकृतदिव्यमङ्गळतनो योगी शतायुर्लसेत् ॥ [७६]

## दर्भशयनम् - आदिजगन्नायकः

श्रीमन् आदिजगत्पते विधिशिलानेत्रीश नारायण
स्वामिन् दर्भशयान हेमवसते कल्याणशोभिन् हरे।
फुल्लारण्यमुनीन्द्रतोयधिमुखप्रत्यक्षमूर्ते विभो
श्रीमत्कल्यरिसूरिसूक्तिविनुत स्तात् आशताब्दं गुरुः ॥ [७७]

## तिरुक्कोलूर - वैत्तमानिधिः

श्रीमन् न्यस्तमहानिधे भुजराट्पर्यङ्कशायिन् हरे
लक्ष्मीनायक देवदेव भगवन् वेदान्तवेद्य आर्तिहान् ।
लक्ष्मीकृत्सुविमानभूषित विभो यक्षेशसाक्षात्कृत
स्वामी नश्शठकोपसूरिविनुत स्तादाशताब्दं गुरुः ॥ [७८]

## श्री अद्भुतनर्तनस्वामी

देवेशाद्भुत नर्तनप्रिय नतत्राणैकनित्यव्रत
श्रीमन् शीतलवल्लिकाप्रिय सुहृत् कल्याणमूर्ते हरे ।
आनन्दाख्यविमानवास वरद ब्रह्मादिसंश्लाघित
स्वामिन् श्रीशठकोपयोगिविनुत स्तादाशताब्दं गुरुः ॥ [७९]

## तेन् तिरुप्पेरेयिल् - श्रीमकरकुण्डलधरस्वामी

ब्रह्मेशानकविप्रसन्न वरद श्रीनीलमेघ प्रभो
श्रीमन् कुण्डलनाममङ्गळमयीदेवीप्रिय श्रीनिधे ।
भद्रारूढ सुरेशपुष्करणिकाकूलानुकूलस्थिते
लीलाभूत्यनुभूतिलोल लसतात् योगी समा आशतम् ॥ [८०]

## तिरुप्पुलिंगुडि - ज्योतिर्देवः

ज्योतिर्देव भुजङ्गराजशयन श्रीशाऽऽश्रिताशाफल
श्रुत्यात्मन् कमलासिनीप्रिय हरे धर्मादिदेवेक्षित ।
कारुण्यैकसुधानिधे गुणनिधे तोयेशसाक्षात्कृत
श्रीमन् श्रीशठजिन्मुनिस्तुत गुरुस्स्तादाशताब्दं मुदा ॥ [८१]

## श्री वैकुण्ठक्षेत्रस्थ - श्री वैकुण्ठनाथस्वामी

श्रीमन् वैकुण्ठवल्लीरमण शशिविमानस्थ वैकुण्ठनाथ
स्वामिन् बृन्दारकेन्द्रप्रमुखनतगणालोकलक्ष्य श्रिताप्त ।
शोभावत्ताम्रपर्णीसरिदुपसरभूकल्पितात्मीयवास
श्रुत्यन्तो लक्ष्मणोऽयं शठरिपुविनुत स्तादिहैवाशताब्दम् ॥ [८२]

## श्री वानमामलै क्षेत्रेशः - श्री देवनायकस्वामी

तोताद्रीश्वर देवनायक हरे श्रीभूमिनीळाप्रिय
स्वामिन् श्रीवरदेविलोल गरुडब्रह्मेशसाक्षात्कृत ।
मार्कण्डेयमहर्षि-रोम-भृगुभिस्सन्तुष्ट सत्यार्थद
दीव्यात् वेदवतंसलक्ष्मणगुरुः मोदात् समानां शतम् ॥ [८३]

## तिरुक्कुरुङ्गुडि - श्रीवैष्णवपूर्णस्वामी

क्षीराम्भोनिधिवैष्णवाद्रिशयनस्थित्युत्थपूर्णप्रभो
देवीवल्लभ पञ्चकेतवसते भक्तेष्टकल्पद्रुम ।
भूतेशेक्षणलक्ष्यभूत गुरुराट् श्रीविष्णुचित्तस्तुत
श्रीकार्यात्मज कल्यरातिविनुत श्रीशैधतां आशतम् ॥ [८४]

## तिरुवण्परिसारक्षेत्रस्थ - तिरुक्कुरळप्पन्

श्रीमन् वामन लोकपाल कमलासंश्लिष्टवक्षस्स्थल
लक्ष्मीतीर्थविहार देव कमलाकान्त प्रपन्नप्रिय ।
सत्यैकाश्रय शक्रमङ्गळविमानान्तस्स्थ कल्याणकृत्
कारीदृष्ट शठारिसन्नुत गुरुः दीव्यात् समा आशतम् ॥ [८५]

## तिरुवनन्तपुरस्थाऽनन्तपद्मनाभानुग्रहः

अनन्तपद्मनाभ भोः अनन्तभोगिनिद्रित
प्रभो रमापते हरेन्द्रचन्द्रगोचर प्रिय ।
सुवर्णकूट सद्विमानवास मत्स्यतीर्थभृत्
शठारियोगिसंस्तुतास्तु नो गुरुः शतं समाः ॥ [८६]

## तिरुवारन्विळै - नागेशयानस्वाम्यनुग्रहः

वामनाम्बुजासनेश सर्वदोपकारक
वामनाख्यसद्विमानवास धातृलोकित ।
न्यासतीर्थजुष्ट सत्यकाम सन्निधे हरे
वेदमौळिलक्ष्मणास्स्युराशताब्दयोगिनः ॥ [८७]

## तिरुवल्लवाय् क्षेत्रीयः श्री कोलप्पिरान्

सौन्दर्यप्रिय विश्वपालक हरे सौन्दर्यवल्लीप्रिय
घण्टाकर्णमनःप्रसन्न भगवन् संसेविकल्पद्रुम ।
स्वान्याशेषविलक्षण प्रपदनप्रीतात्मसंरक्षण
कल्यर्यानुत नो गुरुः शतसमाः बाभात्विहानन्दतः ॥ [८८]

## तिरुक्कडित्तानं - अद्भुतनारायणन्

स्वामिन् अद्भुतदर्शन प्रियनिधे नारायण स्वाश्रित-
त्रातः कल्पकवल्लिकाप्रिय हरे रुक्माङ्गदप्रेक्षित ।
भूतीर्थार्थिपवित्रकृत् गुणनिधे श्री पुण्यकोटिस्थित
स्वामी नः शठमर्दिसूक्तिविनुत स्तात् आशताब्दं मुदा ॥ [८९]

## तिरुमूळिक्कळत्तुरैयुम् - मूळिकळत्तान्

श्रीमन् शैलमयस्थलाश्रय हरे मूळिक्कळाधीश्वर
सद्गन्धो मधुरादिवेण्यधिपते लावण्यसिन्धो विभो ।
हारीताख्यमुनिप्रसन्न भगवन् आर्तार्तिहन् सुन्दर
स्वामिन् श्री शठकोपयोगिविनुत स्तादाशताब्दं गुरुः ॥ [९०]

## तिरुवित्तुवक्कोडु - लोकोज्जीवनस्वामी

लोकोज्जीवनकारणावतरण स्वामिन् दयाळो हरे
भोगीन्द्राधिशयान भक्तिवशिनीजाने द्विजेनेडित ।
चक्राजाश्रय तत्त्वकाञ्चनविमानस्थाम्बरीषेक्षित
भूयात् श्री कुलशेखरस्तुत गुरुः स्तात् आशताब्दं मुदा ॥ [९१]

## तिरुनावाय् क्षेत्रीयः श्रीनारायणः

श्रीनारायण भक्तवत्सल हरे पद्मासिनीवल्लभ
स्वामिन् देवविमानभूषण सरोऽधिष्ठारुणाज्ञाश्रय ।
लक्ष्मीदृष्ट गजेन्द्रवीक्षित विभो रक्षाक्षणावेक्षित
श्रीमन् भूत शठारि-कल्यरिनुत स्तात् आशताब्दं गुरुः ॥ [९२]

लक्ष्मीकेळिगृहायमाणविलसन्नेत्राम्बुजं वाग्वधू-
लीलानर्तनमन्दिरायितमुखं धर्मैकतानाशयम् ।
सङ्ख्यावत्सुजनाभिरक्षणभुजं हंसावतंसं गुरुं
रङ्गेशो ह्यसमस्समस्समवतात् मोदात् समानां शतम् ॥ [९३]

श्रावं श्रावं यदीयं महितशुभगुणं सर्वदं सर्वदा ते
नानादेशात् यमेव ह्यहमहमिकया ह्यागता आमनन्तः ।
विन्दन्त्यद्धा पुमर्थान् शिथिलितकलुषा मोदमाना यतीन्द्राः
ईदृग्योगीशवर्या अकृतकवचना लक्ष्मणास्स्युः शताब्दाः ॥ [९४]

पायं पायं मधुरमधुरां तावकीं वृत्तमाध्वीं
ध्यायं ध्यायं हृदयकुहरे हे गुरो ते सुकीर्त्तिम् ।
नामं नामं तव चरणयोः प्रार्थयामो महं तं
कामं कामं निहतकलुषाः भक्तिसम्पत्तिवित्ताः ॥ [९५]

श्रुत्वा मोदात् यदीयान् महितगुणगणान् सद्भिराकीर्त्यमानान्
नानादेशात् यमेव ह्यहमहमिकया स्वागता आनमन्तः ।
विन्दन्त्यद्धा पुमर्थान् शिथिलितकलुषा मोदयन्तो यतीन्द्रान् ईदृक्षान्
योगिमान्यान् सततमभिनमामस्सदा संस्तुवामः ॥ [९६]

श्रीमन् रङ्गानिधे दयाजलनिधे लोकैकबन्धो हरे
योगीन्द्रादिसुपूजिताङ्घिकमल श्रीभूमिनीळापते ।
कावेरीपुळिनान्तरीपवसते स्वामिन् प्रपनार्तिहन्
धर्मोज्जीवनजागरूक गुरवे देह्याशताब्दं वयः ॥ [९७]

एते सत्सम्प्रदायं प्रमुदितहृदयाः सर्वतस्सञ्चरन्तः
प्रत्नाचार्योक्तसद्वाक्क्रमत उपदिशन्तोऽथ तान् मोदयन्तः ।
भूमिस्तस्याऽऽश्रया या तमिह जगदहो यद्वशं चेति सर्वं
सम्यक् संबोधयन्ती सकलसृतिमती तद्वदेवेह पाति ॥ [९८]

प्राचीनाचार्यवाचां समुचितपथसञ्चारलब्ध्या यथार्थान्
बोद्धुं शक्तो धरित्र्यां अकृतकवचनोत्तंससूरेः न चान्यः ।
स्यादित्यालोच्य सम्यक् सुदृढजगदुदाराश्रयं तं प्रपद्य
स्मारं स्मारं तदङ्घ्रिद्वयमनवरतं नौम्यहं तत्कृपायै ॥ [९९]

एतां आनन्ददां ये श्रुतिहृदतिहितां रङ्गनाथातिहृद्यां
श्रीरङ्गश्रीनिवासाश्रययतितिलकानुग्रहैकानुभाव्याम् ।
सारासारादिबोधोदयहृदनुगुणाः संस्तुतिं संस्तुवन्ति
ते वाभान्त्यात्मशक्त्या जगति चिरतरं यान्ति नित्यात्ममोदम् ॥ [१००]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# दोम्बविल्लि श्रीनिवासपञ्चश्लोकी

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटनाथदेशिकशिरोरत्नप्रभोत्तत्युल्लसत्-
लक्ष्म्या वेङ्कटशैलराट्दयितया जुष्टो दयारूपया ।
बोम्बाय्पतनभागधेयमहितश्रीदोम्वविल्यां पुरि श्रीवासोऽभिनवालये
विजयते दाताऽऽश्रितेभ्यः श्रियः ॥ [१]

लोकाः पादारविन्दद्वयमिह नमतानन्दताऽविन्दतेष्टम्
श्रीशः तिष्ठन् समस्तप्रणतवशकरं त्वेतदेवेति हस्तात्।
संसाराम्भोधिसन्तारणं अतिसुलभं नात्यगाधस्त्वियानि-
त्यन्यं विन्यस्त हस्तं कटितट उरुगायोऽनुगृह्णाति भक्तान् ॥ [२]

त्यक्तवानन्दं पदं तत् परममिह समायादसौ श्रीनिवासः
ब्रह्माण्डे वेङ्कटाद्रौ सुकृतिपरिचिते सर्वसम्पत्समृद्धे ।
पुण्यक्षेत्रैककेन्द्रे चिरतरमथ सर्वत्र शक्तिप्रदानात्
मूर्तीराविश्य सर्वप्रद इह लसतात् सर्वदाऽऽ सूर्यचन्द्रम् ॥ [३]

श्रीशैले श्रीनिवासः परमकरुणया नित्यवासाभिलाषी
नानादेशीयभक्तैः उपचितसुकृतैः सेवितोऽभीष्टदायी ।
प्रेन्धां कालक्रमात् यः समुचितनगरे तत्र तत्र स्वशक्त्या
प्रादुर्भूयाऽखिलेभ्यो ददद‌तुलफलं भ्राजते स्वेन भूम्ना ॥ [४]

श्रीमद्वेदान्तरामानुज गुरुवरनिर्मापिते मन्दिरेऽस्मिन्
स्थेयान् श्रीशैलवासी विलसतु सकलाभीष्टदः श्रीनिवासः ।
आचन्द्रार्क श्रितेभ्यः शुभगुणमहिताः सन्तु दीर्घायुषः ते
श्रीमत्यां दोम्वविल्यां शुभततिरनुयात्वन्वहं क्षेमदात्री ॥ [५]

स्तुतिरियमनवद्या पञ्चपद्या फलाप्त्यै
जयतु विबुधनुत्या सर्वदा सर्वदेशे ।
गुरुवरपदपद्मासेविगोपालगीता पठत
सुमनसेमां सर्वदा सिद्धिदाः स्युः ॥ [६]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्री महालक्ष्मीस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

योगीन्द्रः प्राक्तनैः य स्सुचरितमतिभिः रक्षितोऽवाप्तसिद्धिः
श्रीरङ्गेह्यादिलक्ष्मी स्तदनुगकमलाः नामतो वार्थतो वा ।
ख्याताः श्रीरङ्गनेत्रीं चतुरमतिरयं स्तौति सवार्थसिद्ध्यै
गोपालोऽनन्यपालो गुरुवरकृपयाऽभीष्टसिद्ध्या समिन्धाम् ॥ [१]

श्रीभूनीळाभिः आत्मीय प्रियाभिस्सह मे हृदि ।
श्रीमान् नारायणो नित्यं सन्निधत्तां दयानिधिः ॥ [२]

लक्ष्मीं देवीं शरण्यां अशरणशरणां पूर्णचन्द्राननां तां
विद्युत्वर्णाभिरूपां मणिमयमकुटां फुल्लपद्मायताक्षीम् ।
भूनीळाजुष्टनाथां जलनिधितनयां सुन्दारङ्गीं गुणाढ्यां
नित्यं ध्यायामि भत्क्त्या त्रिभुवनजननीं सर्वदां रङ्गलक्ष्मीम् ॥ [३]

लक्ष्मी नारायणोरौ कृतसुखनिलयां स्वच्छचामीकराभां
कारुण्यापाङ्गनेत्रां मृगमदतिलकां श्लाघ्यपीताम्वराढ्याम् ।
श्रेयोदात्रीं शरण्यां विधुनिभवदनां रत्नभूषोज्वलाङ्गीं
वन्दे तां मातरं तत्पदकमलयुगं सन्ततं चिन्तयामि ॥ [४]

विष्णोर्वामाङ्कभागे स्थिरतमनिलयां मातरं वैष्णवीं तां
हेमाम्भोजद्वयालङ्कृतकरयुगळां स्वेष्टदामादिलक्ष्मीम् ।
अष्टैश्वर्या शरण्यां अभयदरुचिराम्भोजहस्तद्वयाढ्यां
वन्देऽहं विश्वधात्रीं प्रणतसुखकरीं चिन्तयाम्यन्तरङ्गे ॥ [५]

भक्ताभीष्टप्रदात्रीं सकलजननुतां संश्रितत्राणदक्षां
श्रीमन्नारायणेष्टां विनतनुतिवशां कोटिसूर्यप्रकाशाम् ।
दारिद्र्यध्वंसिनीं मां अमृतजलधिजां सर्वलक्ष्मीं दयार्द्री
आर्तत्राणैकसक्तां अनितरशरणो माधवीं सम्प्रणौमि ॥ [६]

लक्ष्मीं क्षीराब्धिजातां फणिपशयनगां स्तोतृसौभाग्यदात्रीं
ब्रह्मेशानेन्द्रशेषस्तुतपदकमलां पूर्णचन्द्राभिरामाम् ।
अज्ञानध्वान्तहन्त्रीं सुविशदमतिदां योगिहृद्ध्यानमान्यां
देवीं ध्यायामि नम्यां अविरतमगतिः नौमि तां विश्वधात्रीम् ॥ [७]

माता त्वं बालिशोऽहं जडमतिरधमः स्तोत्रवश्या दयार्दा
सम्यक् स्तोतुं यते त्वां स्तुतिसरळधियं देहि मे प्रार्थयित्रे ।
बालानां धीप्रदानादिषु च तव भरश्चेत्यभिज्ञैः श्रुता त्वं
दत्वा मे ज्ञानवृद्धिं स्तुतिकृतिविषये पाहि मां त्वां श्रितोऽस्मि ॥ [८]

नित्यं येते पदाम्भोरुहयुगनमनात् प्राप्नुवन्त्यष्टसिद्धिं
प्रोक्तस्तैस्त्वत्प्रभावस्त्विति च बुधजनैः त्वत्कृपां किं वदेयम् ।
त्वत्पादध्यायिने त्वं सकृदपि मनसा सर्वसम्पत्समृद्धिम्
तस्मै दत्वाप्यतृप्ता मनसि सकरुणं खिद्यसे लक्ष्मि मातः ॥ [९]

दुर्वारध्वान्तमूढे मयि यदि करुणा स्यात् तदा विश्वमातः
  कीर्तिस्ते भाति मान्या भुवि शशिसदृशी नेतरस्मिंस्तथाऽतः ।
शोभा रात्रौ यथेन्दोः सकलहिततमा भाति तद्वत् दिने न
  त्राहि त्वं मामतस्स्यात् यदि तव हृदि च ख्यातिलाभेषु चिन्ता ॥ [१०]

मातः मां त्वं न रक्षेः चरणशरणगं नास्ति मे मेऽद्य हानिः
  त्वद्वाक्यं चाप्यसत्यं कलयसि वचनं सत्यसन्धस्य भर्तुः ।
मा भूत् तस्यापि चोक्तिः सततमपि मृषा त्वं ततो मे प्रसीद
  एतां ते स्तोत्ररत्नस्रजमपि विबुधश्लाघनीयां विधेहि ॥ [११]

किं नाद्राक्षीः कदाचित् पशुमृगविहगान् स्वस्ववत्सार्भकेषु
  प्रीत्या वात्सल्ययुक्तानपिच भुवि जडान् नाऽशृणोस्त्वं च लक्ष्मि ।
त्वत्पादस्थे स्वबाले मयि च तव कृपा नास्ति चेत् आश्रितेषु
  क्षुद्रे व्रात्ये कृतघ्ने मयि जगति जनिष्यत्यहो कुत्र वाऽम्ब ॥ [१२]

स्मारं स्मारं सदा त्वां अपि तव करुणां चेतसा दैन्यवाचा
  क्रन्दन्तं पाह्यनाथं त्वयि शरणमितो मा कृथा मय्यवज्ञाम् ।
मान्या नान्या गतिस्स्यात् अपि च मम कदा लक्ष्मि किं वा नु कुर्याम्
  दृष्ट्वा स्मृत्वा च किंचित् त्वमनितरगतिं पश्य माऽपाङ्गदृष्ट्या ॥ [१३]

अम्बाम्बेति स्ववत्सस्वन इति सुरभिः वत्सलाऽतीववेगात्
  वत्सं चागत्य लीढ्याऽवति हि निजपयः पाययन्ती यथाऽऽस्ते ।
श्रुत्वा तद्वन्ममार्तध्वनिमपि जननि त्वत्कृपाक्षीरपात्रं
  मातस्त्वं पाययन्ती ह्यनितरशरणं पाहि मां प्रार्थयेति ॥ [१४]

माता वात्सल्यपूर्णाऽखिलजननि यथा स्वाभिमानात् शिशोश्च
प्रीत्या वार्ता शृणोतीत्यपि जगति तथा प्रार्थनां मे शृणु त्वम् ।
मत्प्रारब्धाघजाधिं ह्यनुभवितु महो तन्न शक्यं मयाऽतः
किञ्चिद्वात्सल्यतो मय्यपि तव तनये लक्ष्मि मां रक्ष मातः ॥ [१५]

दृष्ट्वा मत्कर्मजाघं त्वं इह कथमसौ तारणीयः कृपायाः
पात्रं स्याच्चेति मत्वा मयि तव करुणां अम्ब मे नातनोषि ।
कर्तृत्वं कस्य वा का सकलनियमने चाधिकर्जीति सम्यक्
दृष्ट्वाऽऽलोच्य प्रसादं त्वदनितरगतौ कर्तुमर्हस्यनाथे ॥ [१६]

मित्रं दृष्ट्वा तमांसि स्वबिलमविकलं यान्त्यदृश्यानि हित्वा
तद्वन्मत्कर्मजाऽघान्यविरतमपि सुध्यायिनं मातरं त्वाम् ।
मां चादृश्यानि यायुः मयि तवकरुणादिक्षणात् पूर्व मेव
तत् न ज्ञातं त्वया किं त्विति मयि करुणां प्रार्थये निक्षिपाम्ब ॥ [१७]

हे मातः लक्ष्म्यनाथे मयि तव करुणा चेषदप्यद्य नो चेत्
कान्तस्ते मत्पिता हो सकृदपि मनसा न स्मरेदप्यतस्त्वाम् ।
काङ्क्षा स्याच्चेत् दयायां जननि सपदि ते त्वत्प्रियस्यात्मजेऽपि
वत्से वात्सल्यपात्रे मयि च कुरु कृपां देवि वां आश्रितोऽस्मि ॥ [१८]

माभीः वत्सेति कर्णामृतवचनसुधां पातुमिच्छामि तेऽम्ब
चिन्ताशोकाग्निदग्धं मम हृदयतलं सिञ्च पीयूषवृष्टया ।
हस्तेनैवाभयं देह्यपि तव चरणौ लक्ष्मि मूर्ध्न्यर्पयाम्ब
क्षिप्रं याञ्छामिमां त्वत्सहजकरुणया साधु मातः कुरुष्व ॥ [१९]

मातः त्वत्पादपद्म शरणमुपगतस्योत्तमाङ्गस्थितां तां
 दृष्ट्वा दुर्वर्णपङ्क्ति विधिकरलिखितां मार्जयित्वा दयार्दा ।
वात्सल्यात् त्वं सुवर्णं परिणमयसि तां त्वत्कृपां किं वदेयम्
 दृष्ट्वा तत्कर्मजाघान्यपि सभयमहो तं पलायन्ति हित्वा ॥ [२०]

मातः त्वत्पादपद्म रुचिरमपि कदा लक्ष्मि सेवेयमार्तं
 भूमे कारुण्यदृष्ट्या प्रणतं अशरणं द्रक्ष्यसि ब्रूहि नीळे ।
प्रारब्धाघापहार्यं भवदुरुकरुणापाणिना त्रास्यसे मां
 युष्मत्कारुण्यपात्रं ह्यनवरतमपि स्यामहं निर्विशङ्कम् ॥ [२१]

हे वत्साऽपास्य शोकं त्वमखिलमपि च हे लक्ष्मि हे भार्गवि श्रीः
 हे भूमे हेऽम्ब नीळे त्विति मनसि सदा मातरं सानुकम्पाम् ।
भक्तया ध्यायस्व नित्यं व्यसनदनिखिलासह्यकर्मप्रवाहात्
 सत्यं त्वं मोक्ष्यसे नः सततमपि दयां प्राप्नुयाः श्रीपतेश्च ॥ [२२]

हे लक्ष्मीभूमिनीळाः मधुरिपुदयिताः मातरः सानुकम्पाः
 श्रीमन्नारायणस्याखिलभुवनपतेः अस्य पार्श्वद्वयेऽपि ।
यूयं न स्यात यद्वाश्रितमपि च पिता पापिनां अग्रगण्यं
 किं कुर्यां प्राप्नुयां कां गतिमपि शरणं स्यान्न युष्मान् विना यः ॥ [२३]

माता त्वां मे पिता त्वं स्थिरसुखदगुरुः त्वं सखेवात्मवन्धुः
 पुत्रस्तेऽहं च शिष्यः त्वदनितरगतिः रक्षणीयस्त्वयाऽतः ।
कान्तस्ते त्वत्कटाक्षामृतलवलहरीमप्यहो वाञ्छतीशः
 देवि त्वां प्रार्थये त्वच्चरणशरणगे किञ्चिदम्ब प्रसीद ॥ [२४]

त्वय्यम्ब प्रार्थनीयं किमपि यदि मयाऽऽलोच्य संसूचयाऽम्ब
त्वत्पादाब्जे प्रपत्तिं प्रसदनजननीं त्वां विनाऽन्यं न जाने ।
श्रुत्वाङ्ग स्तोत्रपङ्क्तिं श्रुतिशतमधुरां आसं आनन्दपूर्णः
माभीः रक्षाम्यहं त्वां किमपि च न मयि प्रार्थनीयं त्वयान्यत् ॥ [२५]

पद्म दोषानभिज्ञे कृपणं अशरणं पुत्रवात्सल्यतोऽस्मिन्
दारिद्र्यध्वंसिनि त्वच्चरणं उपगतं पापिनं निस्सहायं ।
अंहो दूरं महान्तं सुचरितमहितं सद्गुरूदीरितज्ञं
सर्वोपादेयमार्गाचरणगुणनिधिं कुर्विमं पाहि मातः ॥ [२६]

त्वत्कारुण्यैकरक्ष्यः त्वयि निहितभरः त्वत्प्रियाऽनन्यवीक्ष्यः
त्वत्पादाम्भोजयुग्मे स्थिरनिहितमतिः पूर्णविश्वासशाली ।
अत्यन्ताकिञ्चनोऽहं निरवधिकरुणे लक्ष्मि मातः शरण्ये
सर्वेश्वर्याकरे त्वां शरणमुपगतो निर्भयो निर्भरोऽस्मि ॥ [२७]

मातः त्वत्पादपद्म शरणं उपगतं त्वद्दयाचातकं मां
त्वत्कारुण्यैकपात्रं त्वदनितरशरणं त्वत्कृपापाङ्गदृष्ट्या ।
त्वत्कान्तेनैव सार्धं प्रियतमवचसा मत्कृते लक्ष्मि दृष्टा
मा भीर्वत्स प्रवर्षाम्ययि मम करुणां इत्युदीर्य प्रसीद ॥ [२८]

विज्ञानसम्पत्सुखदे प्रसीद
विचित्रवाक्भूतिकृत् अब्धिकन्ये ।
हे श्रीः सदा मे शरणागतस्य
देह्याश्रयं त्वत्पदपद्मसद्मनि ॥ [२९]

स्तोत्रेणानेन मे श्रीः त्वदनितरधिया मत्कृतेनाम्ब न स्यात्
बाले प्रीतिर्विचित्रा प्रियजनकवचो नैव जाने त्वदिष्टम् ।
पादाब्जे ते प्रपद्ये सपदि यदि दयाऽतोऽपि न स्यात्तदाहं
प्राणत्यागो वरस्त्वत्पदकमलकृते सत्यमेतत् प्रसीद ॥ [३०]

वन्दे विश्वप्रियां त्वां प्रपदनसुलभां मातरं विष्णुकान्ते
ध्यायामि त्वद्गुणौघान् सुरमुनिविनुतान् कीर्तयाम्यन्वहं तान् ।
मात्याक्षीर्मा तवार्त चरणशरणगं सौम्यकारुण्यमूर्ते
याचे मत्प्रार्थनां हे भगवति भवतीं साधु मातः कुरुष्व ॥ [३१]

सम्प्रार्थयेऽद्य विधिवेदफणीन्द्रमुख्यैः
स्तोतुं न शक्यमपि ते महिमान मीषत् ।
वाग्देवते जडधिये त्वदभिष्टवार्हां
वाचं प्रदेहि यदि मे मयि ते दया स्यात् ॥ [३२]

त्वत्स्तोत्रझङ्कारसुशंब्दजालैः
त्वत्पादपद्मस्थमधूनि पातुम् ।
लोलायमानं चरणारविन्दे हे
लक्ष्मि पश्याम्ब हि दासभृङ्गम् ॥ [३३]

त्वामेव संस्तुत्य तवाङ्घ्रिपद्मे
पद्म स्पृहाळोः श्रितकामधेनो ।
हे लक्ष्मि नित्यं श्रुतिमौळिवेद्ये
मान्यैकलभ्यां दिश मेऽम्ब भक्तिम् ॥ [३४]

नित्यं रमे ते चरणारविन्दे
  विन्देऽनन्घां भक्तिं उदारभावे ।
विष्णुप्रिये सर्वसहिष्णुशीले
  मत्पापं अत्यल्पं अपास्य पाहि ॥ [३५]

पवनात्मजसेविताङ्घ्रिपद्मां
  अपराधिक्षणदाचराङ्गनाम्यः ।
दययाऽभयदां प्रणौमि लक्ष्मीं
  दयितां दाशरथेः दयैकमूर्तिम् ॥ [३६]

दिनकरकुलदीपां जानकीं रामकान्तां
  दशरथनृपसन्तोषप्रदां सौम्यलक्ष्मीम् ।
ऋणजलधिगतानां पोतपात्रीं नमामि
  प्रणतदुरितहन्त्रीं रौद्रदारिद्यहन्त्रीम् ॥ [३७]

प्रदिशतु मम सीता सा दया रामभक्तिं
  वितरतु निजभक्तिं त्वत्पदाम्भोजयुग्मे ।
प्रदिशतु जयलक्ष्मीः श्रीमदाचार्यभक्तिं
  प्रदिशतु सततं मे सर्वसम्पत्समृद्धिम् ॥ [३८]

कुशलवसुतमातः लक्ष्मि दासस्य मातः
  सकलभुवनमातः वाञ्छितार्थप्रदात्रि ।
कुवलयदलनेत्रि क्रूरदारिद्यहन्त्रि
  प्रगुणजनकपुत्रि त्राहि मां श्रीप्रदात्रि ॥ [३९]

वाणीशगौरीशशचीशमुख्यैः
 समर्चिते दिव्यसुगन्धपुष्पैः ।
हे लक्ष्मि नित्यं सरसीरुहाक्षि
 त्वत्पादपद्म मम देहि भक्तिम् ॥ [४०]

त्वत्पाददासाश्रितदासदास
 दासाश्रितानां पदपद्मरेणोः ।
गोपालबालस्य च ते पदाब्जे
 हे लक्ष्मि पूर्णां दिशमेऽतिरक्तिम् ॥ [४१]

वैकुण्ठदिव्यवसुधादिसमस्तपुण्य-
 क्षेत्रेषु भोगिशयने श्रुतिमौळिवेद्याम् ।
नारायणेन सहितां स्मितसुन्दरास्यां
 लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [४२]

श्रीरङ्गनाथदयितां विधिशङ्करेन्द्रैः
 नित्यं स्तुतां मुनिवरैः विनुताङ्घ्रिपद्माम्।
आदित्यबिम्बनिलयां सनकादिसेव्यां
 लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [४३]

श्रीवेङ्कटेशदयितां श्रियं अम्बुजाक्षीं
 वात्सल्यपूर्णहृदयां शरणागतेषु ।
योगीन्द्रलक्ष्मणशिरोधृतपादपद्मां
 पद्मावती' अशरणः शरणं प्रपद्ये ॥ [४४]

श्रीशार्ङ्गपाणिविपुलोरसि नित्यवासां
  स्वाधीनकान्तहृदयां प्रणतार्तिहन्त्रीम् ।
दारिद्रियविद्रुतमनोव्यसनार्तिहन्त्रीं
  मां कोमळां अशरणः शरणं प्रपद्ये ॥ [४५]

नारायणस्य दयितां यदुशैललक्ष्मीं
  संसेवितां च विनुतां यतिराजमुख्यैः ।
भक्तानुरूपफलदां अभयप्रदात्रीं
  लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [४६]

हस्त्यद्रिनाथदयितां महतीं च देवीं
  श्रुत्यन्तलक्ष्मणगुरूत्तमनित्यनुत्याम्।
वेदान्तसूरिसुवचोऽनुगुणार्थदात्रीं
  लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [४७]

श्रीसोसलेपुररमानिधिवेणुगोप-
  देवालयस्थभगवद्दयितां प्रसन्नाम्।
वेदान्तलक्ष्मणगुरूत्तमसेवितां तां
  पद्मावतीं अशरणः शरणं प्रपद्ये ॥ [४८]

श्रीरङ्गदिव्यनगरे श्रितनित्यवासां
  श्रीरङ्गनाथदयितां मम मातरं ताम् ।
श्रीश्रीनिवासगुरुपङ्क्तिनताङ्घ्रिपद्मां
  लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [४९]

रत्नोपलादिखचिते मणिमण्डपे श्री-
सिंहासने च सुमनोभिरलङ्कृते ताम् ।
श्रीरङ्गनाथसहितां श्रितकल्पवल्लीं
लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [५०]

श्रीरामचन्द्रदयितां सदयां अयोध्या-
पुर्यां च राघवसतीं जनकात्मजां ताम् ।
वातात्मजाभिविनुतां प्रणतार्तिहन्त्रीं
लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [५१]

पूर्णेन्दुबिम्ववदनां कमलायताक्षीं
श्रीजानकीं रघुपतेः प्रियवल्लभां ताम् ।
भक्त्या विभीषणकरार्चितपादपद्मां
लक्ष्मीं अनन्यशरणः शरणं प्रपद्ये ॥ [५२]

गोपालभक्तियुतसूक्तिनुतां प्रसन्नां
श्रीरुक्मिणीं सकरुणां श्रितसत्यभामाम् ।
संसेविताश्रितनुताङ्घ्रिसरोजदेवीं
पद्मालयां अशरणः शरणं प्रपद्ये ॥ [५३]

श्रीरङ्गनाथदयितां श्रितकल्पवल्लीम्
श्री श्रीनिवास रमणीं करुणामयीं ताम् ।
हस्त्यद्रिनाथदयितां श्रितकामधेनुं
नारायणप्रियतमां शरणं प्रपद्ये ॥ [५४]

मातः कृपाजलनिधे शरणागते त्वं

लक्ष्म्याश्रिते मयि सदा श्रितकामदोग्ध्री ।
किञ्चित् कटाक्षलहरीं अवतारयेति
त्वां प्रार्थयेऽहमधुना दयया प्रसीद ॥ [५५]

मातः सुधाब्धितनये कमले दयाब्धे
त्वत्पादपद्मयुगळे शरणागतेऽस्मिन् ।
देवि प्रसीद दयया शरणैकनिष्ठं
कारुण्यदृष्टिसुधया ह्यभिषिञ्च मे माम् ॥ [५६]

प्रपद्ये रङ्गनेत्रीं तां रङ्गेशोरोविहारिणीम् ।
शरणं सानुकम्पां मां शरणागतरक्षिणीम् ॥ [५७]

श्रीरङ्गेशरमे वृषादिपरमे नागाचलाधीशमे
यद्बद्रीशरमे वनाचलरमे श्वेताचलाधीशमे ।
हे श्रीः शाङ्गधरेशकोमलरमे क्षीराब्धिनाथादिमे
सर्वा एव रमाः कुरुध्वमिह मां स्वस्वैकसेवाकृते ॥ [५८]

ऐश्वर्य ह्यदिशो यथा मघवते मातः समस्तार्थदे
मान्यस्स्यात् विवुधैः अयं त्विति सदामोदप्रदो हे रमे ।
सन्मान्योऽस्त्विह सर्वदैकशरणः सद्योगिराडीक्षितः
इत्यालोक्य हि मे प्रदेहि परमैकान्तिश्रियं मे प्रियाम् ॥ [५९]

लोकैकेशप्रियां तां निजगुणमहितां श्रीनिवासातिहृद्यां
कारुण्यैकस्वभावां श्रितजनसुलभां तत्तदिष्टार्थदात्रीम् ।
दीनानाथैकरक्षाकरणमतिमतीं प्रार्थनाकल्पवल्लीं
श्रेयोदात्रीं विधात्रीं त्रिकरणशुचितो मातरं स्तौमि भक्तया ॥ [६०]

हे श्रीनिवासप्रियवल्लभे श्रीः
  गोपालबालं शरणागतं त्वाम् ।
मां मात्यजेः पश्य मयि प्रसन्ना
  त्वदिष्टमेवास्ति मामपि हृद्यम् ॥ [६१]

चापभ्रूलसिते चतुर्भुजयुते सौभाग्यदे पद्मजे
  चारूक्त्या प्रविनोदितात्मरमणे चार्वानने माधवि ।
चार्वङ्ग कमले दयार्द्रहृदये चारूदरे त्वामहं
  त्वत्कारुण्यसुधेप्सया सुविशदं नौमि प्रसीदाम्ब मे ॥ [६२]

मातः त्वां ज्ञानिनुत्यां मतिलवरहितः स्तोतुमैच्छं विमूढः
  ध्यातुं च त्वद्गुणौघान् त्वदितरविषयाक्रान्तचित्तोऽभवं प्राक् ।
द्रष्टुं वक्त्राम्बुजं तेऽन्यविषयनयनोऽभक्त आसं प्रणन्तुं
  अद्य त्वत्पादपद्म त्विह मदभिमतं कारितं साधु मातः ॥ [६३]

मातः श्रीः श्रीनिवासप्रणयिनि पितरं दर्शयस्याश्रितानां
  श्रुत्वा चार्तध्वनिं त्वं शमयसि मयि तत्कोपं आर्ते हरेश्च ।
वात्सल्यं मय्यनाथे जनयसि दयया लक्ष्मि देव्यम्ब चाहं
  त्वत्कारुण्यं वदेयं किमिति हि पतिते त्वां सदा चिन्तयामि ॥ [६४]

माता त्वं मे पिता त्वं त्वशरणशरणे पुत्रवात्सल्य पूर्णे
  पुत्रानिष्ठासहिष्णो त्वदनितरगतिं श्रीनिवासानुकम्पे
वत्सं ते देवि मातः त्वदनितरधियं त्वत्कृपाचातकं मे
  दारिद्र्यध्वंसिनि त्वञ्चरणशरणगं पाहि गोपालबालम् ॥ [६५]

कल्याणोल्लाससीमा कृतिषु निवसतात् आदिलक्ष्मीः प्रसन्ना

धन्यानां धान्यलक्ष्मीः अनुकल मनुकूलाऽऽहितोदारशीला ।
कार्याणां सात्विकानां सकलशुभकरी धैर्यलक्ष्मीः समास्ताम्
धर्मोद्धर्त्री धरित्र्यां बहुधनमहिता हस्तिलक्ष्मीः समिन्धाम् ॥ [६६]

दद्यात् सन्तानलक्ष्मीः सकलकुलहितां सत्सुसन्तानलक्ष्मीं
धात्रीलक्ष्मीः विजेत्री वितरतु विजयं सर्वदा सर्वदात्री ।
विद्यालक्ष्मीः प्रसन्ना विलसतु मतिमत्यत्युदारस्वभावा
लक्ष्मीः शश्वत् धनाढ्या दिशतु बहुधनं सर्वलोकप्रधानम् ॥ [६७]

दद्यात् कीर्तिं प्रसन्ना परमसुकृतिनां भूतये ऽभूतपूर्वा
देवी पद्मावतीयं श्रितजनमहितार्थप्रदात्रीति सत्यम्।
अत्रत्यासक्तिभूम्ना विलसति विजया सर्वदास्ते प्रवृद्धाः
यूयं भूयास्त संरक्षणविधिनिरताः त्रायतेमां शमास्ताम् ॥ [६८]

लक्ष्मीवीक्षाप्रतीक्षानुगुणसफलिता पद्मिनी सुप्रतिष्ठा
श्रीमद्वेदान्तरामानुजगुरुकृपया श्रीनिवासालये हि ।
मा अष्टापीष्टदात्र्योऽप्यनुसृतकृतयः स्वानुरूपानुरूपाः
अष्टार्थेष्विष्टदात्री विलसति महिता श्रीनिवासोत्सवश्रीः ॥ [६९]

देवश्रीः शुभदर्शिनी हितकरी सर्वेष्टदा माधवी
वेदश्रीः श्रुतिमार्गिणी सुविमला सर्वोत्तरा शाश्वती ।
ब्रह्मश्रीः द्रुहिणप्रसूः सुचरिता सर्वाकृतिर्भार्गवी
पुण्यश्रीः हृदयङ्गमा शुभकरी विश्वम्भरा पातु नः ॥ [७०]

सप्तत्यां सारवत्यां विनिहितमतयः सन्तु संसारसाराः
सुप्ता नु स्युः सुगुप्ताः स्वहितपरहितासक्तिभूम्ना लसन्ति ।
लक्ष्मीरेषा स्वभूम्ना विविधसुफलदा भक्तसर्वेष्टदात्री
तां एतां कीर्तयन्तः सुकृतिन इह संशोभमाना जयन्ति ॥ [७१]

सर्वाद्या कलिनाशिनी प्रविमला भोगप्रिया सर्वदा
विश्वश्रीः परभक्तिदा कलरवा प्रोत्तारणी शान्तिदा ।
सत्कीर्तिः समदर्शिनी दृढमतिः रत्नावळी रुक्मिणी
पद्माक्षी विभवप्रदा सुरसिका नारायणी पातु नः ॥ [७२]

सर्वज्ञा गरुडासना भगवती यज्ञाशिनी पाविनी
गायत्री गुणभूषणा सुगहना मेधाविनी भार्गवी ।
दिव्याङ्गा सुफलप्रदा सुमधुरा पद्मासिनी हर्षिणी
राजश्रीः शुभदेवता सुवदना चारुस्मिता पातु नः ॥ [७३]

योगक्षेमवहा त्रिलोकजननी ब्रह्मस्तुता सुस्थिरा
कूटस्था कुलनन्दिनी द्युतिमती धीरा मनीषाकृतिः ।
सर्वज्ञा कृतलक्षणा प्रथमजा माता वरिष्ठाऽनघा
भद्राङ्गी सुगुणोत्तरा विजयदा शोभानना पातु नः ॥ [७४]

भक्तानां कल्पवल्लीं श्रितजनसुरभिं भक्तचिन्तामणि तां
भक्तत्राणोत्कटेच्छां नवनिधिजलधिं भक्तहृद्ध्यानगम्याम् ।
देवि त्वां प्रार्थयेऽद्य प्रपदनसुलभां त्वत्कृपापाङ्गदृष्ट्या
भक्तार्तिध्वंसिनि त्वच्चरणशरणगं पश्य मां किञ्चिदम्ब ॥ [७५]

सौम्या वेदमयी क्षमा गुणमयी दारिद्र्य विध्वंसिनी
सुप्रीता वरदा रमा सुनयना विष्णुप्रिया पद्मिनी ।
धर्मोद्धारकृतादरा सुहृदया दीनाश्रया मेदिनी
गम्भीरा कमलेक्षणा श्रुतिमयी धर्मोदयापातु नः ॥ [७६]

पूर्णानन्दमयी यशस्सुखकरी तापत्रयोन्मूलिनी
पद्मायोगकरी मुकुन्ददयिता विश्वप्रिया क्षेमदा ।
सर्वारिष्टनिवारिणी सुफलदा सर्वेश्वरी सर्वदा
श्रीरित्यन्वहं आदरात् पठति योऽपायात् स संरक्ष्यते ॥ [७७]

देवीं विश्वप्रियां तां श्रुतिहितमहितां स्वर्णवर्णा शुभाङ्गीं
वन्दे पद्मासिनीं स्वानतजनसततानुग्रहात्तैकतानाम् ।
यद्वक्षोवासतो या समधिकरसिका तं प्रियाळुं दयाळुं
तेने भक्तावने मां त्रिभुवनजननीं सर्वदा सर्वदात्रीम् ॥ [७८]

संसाराम्बुधितारिणीं जयकरीं संसिद्धिदां मुक्तिदां
शास्त्रोक्ताचरणप्रियां शुभकरीं सौभाग्यदां सन्नुताम् ।
लक्ष्मीं इन्दुमुखीं श्रयेऽतिसुखदां कारुण्यपूर्णाकृतिं
पूर्णा अद्भुतसद्गुणैः शुभकरीं पद्मावतीं संश्रये ॥ [७९]

वंशं वाह्यं जगत्यां जडमपि मधुरं वादयन्तश्च दृष्टाः
इत्येवं वासुदेवो मुखरयति यदि स्यात् तदत्यद्भुतं किम् ।
मूकीभूतान् अयत्नात् कवयति भवतीत्येतदत्यभुतं हि
मादृक्षा एव दृष्टान्तत इह बहुशः कीदृशी ते दयाऽस्मिन् ॥ [८०]

श्रीशैलाधीशकान्ते भगवति भवतीदिव्यनामानुषङ्गात्
मादृक्षाणां असारं कवनं अतिरसं विद्वदास्वादनीयम् ।
कर्पूराद्यैः सुगन्धैः सहजपरिमळैः गन्ध शून्येपि चूर्णे
सौगन्ध्यं सर्वसेव्यं प्रभवति हि यथा देवि सन्मानितः स्याम् ॥ [८१]

देयं मह्यं दयाळो स्वयं अभयं इहाऽगर्ह्यकृत्याय पद्मे
नाहं कुप्यामि कस्मैचिदपि जगति मे नैव पापी न तापी ।
पीत्वा पीयूषं अज्ञासिनि जननि भवत्पादपद्मद्वयस्य
श्रीमन्नारायणाङ्घ्र्यम्बुजयुगगममुं पालय त्वां प्रपद्ये ॥ [८२]

लोकाम्बैका जगति भजतां शं तनोतीह यावत्
सम्भूयान्यैः दिविजशतकैः तत् विधातुं न शक्यम् ।
राकाचन्द्रोद्विदळिततमः किं नु शक्यं ह्यसंख्यैः
नक्षत्रैर्वा भवति सुकरं तत् तमोनाशनं मे ॥ [८३]

प्राज्यं साम्राज्यमेव प्रदिशति भवती पूजिताप्येकवारं
त्वत्तोऽन्यैः देवि देवैः असकृतभिनुतैः अप्यशक्यं प्रदातुम् ।
दृष्टः श्रीरामसेतुः वितरति सकृदेवेष्टसिद्धिं प्रजाभ्यः
दृष्टैः नैवार्थलाभः सततमपि नदीसेतुभिश्चाप्यसङ्ख्यैः ॥ [८४]

मातः सत्स्वपि मन्तुषु श्रितजने कारुण्यतो रक्षसि
स्वीयेषु ईषदघाय रोषकलुषाः त्वत्तोऽपरे स्यू रमे ।
छेत्तुस्तापहरो ददाति दयया वृक्षोऽपि छायां निजां
स्पर्शादिव सरीसृपाः अतिरुषा घ्नन्त्येव संरक्षिणम् ॥ [८५]

आयासो हि महान् फलं त्वतिलघु स्यादन्यदेवार्थिनां
सोऽत्यल्पोऽपि भवेत् फलं त्वतिमहत् त्वां देवि संसेविनाम् ।
क्षोदीयः फलमेति याति लवणव्यापार्यहोऽतिश्रमात्
यत्नोऽल्पोऽपि अमितं फलं हिततमं कर्पूरवाणिज्यवान् ॥ [८६]

गङ्गाधर्तुर्धनुस्तत् त्वरितं अनितराऽभञ्जनीयं बभञ्ज
कान्तस्ते देवि काले रघुकुलसुयशः पातुं अब्धिं बबन्ध ।
संशिश्ये यत्र देवः तमथ जलनिधिं यो यदर्थं ममन्थ
तत्तादृक्देवदेवि स्वयमिह भवती रक्षतात् त्वत्प्रजां माम् ॥ [८७]

देयेयं राघवायेत्यनवगतभयो योऽग्रजायाऽऽग्रहेणै-
वोक्ता तत्पीडितोऽभूत् अनुपदं अभयं दत्तं अस्येति मातः ।
प्राज्यं राज्यं च लेभे भवति भगवताऽरंभवद्वल्लभेन
दुःखं यत् स्यात् त्वदर्थं लघुतरमपि तत् भूयसे श्रेयसे नः ॥ [८८]

हे श्रीः पद्माधिवासिन्युरुतरकरुणे देवि विश्वप्रिये नः
वद्धाञ्जल्येकतुष्टा नतनुतजनताभीष्टदाऽथो मुकुन्दम् ।
नित्यानन्दैकपूर्णं पदमपि ददतीं त्वां विना फल्गुनीह
माभूत् सैषोत्तरा वाक् अनितररसिका जात्वपीत्येव याचे ॥ [८९]

लोके केचित् सुरेशं जलनिधितनये यागिनस्तोषयन्ति
अन्ये भीवारणार्थं नरहरिवपुषं योगिनोऽर्चन्ति देवम् ।
अन्ये दुग्धाब्धिकन्ये स्मरहरभजनं तन्वते सर्वदापि
पद्म त्वामेव नानाविधभजनमुखैः संस्तुमः सर्वदां मे ॥ [९०]

धन्ये मन्येब्धिकन्ये श्रुतिरपि भवतीं प्राभवत् न प्रणोतुं
मान्यां सामान्य एषः तव गुणविभवं शक्नुयात् किं तथापि ।
फल्गुन्युत्तर्क्षजातोऽस्त्यमिति कृपया फल्गुनीतां अपोह्य
सारां वर्णोत्तरां तां अमरवरगिरं मेऽददाः तत् प्रणौमि ॥ [९१]

देवः स्वस्वावतरे प्रकृतिनियमं आदर्शयन्नप्यमोघं
क्वाचित्कोल्लङ्घनं चाचरदपि भगवान् इङ्गितज्ञो हि मातः ।
पद्म त्वं क्वापि नैवं जलधिविमथने यद्वदेवाऽथ तद्वत्
भूत्पत्तावप्यभूस्त्वं प्रकृतिनियततां प्राव चित्रं चरित्रम् ॥ [९२]

अग्नौ शैत्यानुमानं जगति न विदितं बाधितं चेति नीतिः
प्रख्यातैषाम्व लोके सकलजनमनोवेदिता तार्किकी च ।
श्रीशैलाधीशलोले भगवति कमले मातरिश्वात्मजस्य
मातः वालानलं त्वं सुललितं अकरोः शीतलं भूतलेऽत्र ॥ [९३]

सुधापयोधिसम्भवे मुधा वदान्यतान्यतः
न दानवारिदार्वपि प्रयाति ते वदान्यताम् ।
रमे त्वमेव मे हिता ह्यमेयसम्पदाश्रया
रमासमारमा सदा दयामयोदयाऽसमा ॥ [९४]

वन्दे कुण्डलशोभिकर्णयुगळीं सौम्यप्रवाळाधरां
पद्मां रत्नविभूषणोज्वलमहावक्षस्स्थलालङ्कृताम् ।
तां वाहूल्लसितां गदां शुभकरीं जाम्बूनदोद्भासिनीम्
हस्तात्युज्वलदङ्गुळीयकरुचिं पद्मावतीं मातरम् ॥ [९५]

सर्वज्ञा समदर्शिनी भगवती प्रोत्तारिणी हर्षिणी
विश्वश्रीः कलिनाशिनी सुरसिका मेधाविनी रुक्मिणी ।
पद्माक्षी विभवप्रदा सुमधुरा शोभानना पाविनी
योगक्षेमवहा रमा सुचरिता पद्मावती पातु नः ॥ [९६]

सुप्रीता वरदा दयैकहृदया धर्मोदयामोदिनी
पूर्णानन्दकरी मुकुन्ददयिता दीनाश्रया सौख्यदा ।
सत्वैकप्रियकारिणी सुफलदा सर्वेश्वरी वत्सला
सर्वारिष्टनिवारिणी हितकरी लक्ष्मीः सदा पातु नः ॥ [९७]

श्रीरङ्गाधीशलक्ष्मीं वृषगिरिशिखरश्रीशपद्मावतीं तां
विष्णोर्वक्षस्थलस्थां श्रितजनहृदयानन्दसंवर्धयित्रीम् ।
हस्त्यद्रीशानलक्ष्मीं श्रितजनदयनीयस्वभावां उदाराम्
लक्ष्मीं यद्वद्रिनेतुः विनतशुभकरी प्राणुमः पान्तु सर्वाः ॥ [९८]

महालक्ष्मीं याचे सकलभुवनैकान्तजननीं
दधानां हस्तान्तनवनिधिनिभाः का अपि कलाः ।
प्रयुक्ता आत्मार्थाः प्रहसितमुखाः दानसुमुखाः
गुरौ पूर्णां भक्तिं मुहुरभयदां देहि सुलभाम् ॥ [९९]

श्रीमद्वेदान्तरामानुजगुरुकरुणापालितो बालतोऽतः
श्रीमच्छ्रीवासयोगिप्रवरपदकृपैकात्तधीसम्पदाढ्यः ।
श्रीमच्छ्रीरङ्गयोगीक्षणमहिमा दर्शितान्त्याश्रमश्रीः
गोपालः श्रुतिमौळिलक्ष्मणगुरूदाराश्रयोऽस्तौत् रमाम् ॥ [१००]

शतकं उदधिजायाः प्राज्ञगोपालगीतं
 जयतु सकलसद्धे सत्फलावाप्तयेऽत्र ।
गुरुवरपदपद्मास्वादलोलावगीतं
 पठत सुजनहृद्यं सत्फलावाप्तये स्यात् ॥ [१०१]

एषः श्रीवासदेवालय इह सुचिरं वर्धतां सर्वरीत्या
 इत्याशास्तिं गुरूणां सकलहितकरी स्मारये मोदमानः ।
एवं सर्वत्र देवोत्सवकृतिरनघा प्रैधतां सर्वरीत्या
 सौहार्द भक्तवृन्दे विलसतु नितरां सर्वलोक स्सुखी स्तात् ॥ [१०२]

कावेरीतीरलोलः सरसिजतनयावल्लभः श्रीनिवासः
 तद्वासः सोसलेपुरि अतिशयमहिमा कृष्णराजाग्रहारे ।
गोपालो वेणुलोलः स उभयदयितः साधयत्यात्मवाञ्छाम्
 इत्युद्धुष्यत्यमोघो निखिलसुमनसां दुन्दुभिर्वत्सरोऽयम् ॥ [१०३]

सर्वत्र सुहृदस्सन्तु नश्यन्तु द्विषदः सदा ।
पद्माश्रीशमहासद्मसेवकाः सन्तु निर्भयाः ॥ [१०४]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्रीमहालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

देवश्रीः प्रियदर्शिनी हितकरी सर्वेष्टदा माधवी
वेदश्रीः श्रुतिमार्गिणी सुविमला सर्वोत्तरा शाश्वती ।
ब्रह्मश्रीः द्रुहिणप्रसूः सुचरिता सर्वाकृतिः भार्गवी
पुण्यश्रीः हृदयङ्गमा शुभकरी विश्वम्भरा पातु नः ॥ [१]

सर्वेष्टा कलिनाशिनी सुतरुणी भोगप्रिया कामिनी
विश्वश्रीः परभक्तिदा कलरवा प्रोत्तारिणी शान्तिदा ।
सत्कीर्तिः समदर्शिनी दृढमतिः रत्नावळी रुक्मिणी
पद्माक्षी विजयप्रदा सुरसिका नारायणी पातु नः ॥ [२]

सर्वज्ञा गरुडासना भगवती यज्ञाशिनी पाविनी
गायत्री गुणभूषणा सुगहना मेधाविनी भोगिनी ।
दिव्याङ्गा सुफलप्रदा सुमधुरा पद्मासिनी हारिणी
राजश्रीः शुभदेवता सुवदना चारुस्मिता पातु नः ॥ [३]

योगक्षेमवहा त्रिलोकजननी ब्रह्मस्तुता सुस्थिरा
कूटस्था कुललक्षणा प्रथमजा माता वरिष्ठाऽनघा ।
सर्वज्ञा कुलनन्दिनी द्युतिमती धीरा मनीषाकृतिः
भद्राङ्गी सुगुणोत्तरा विजयदा शोभानना पातु नः ॥ [४]

सौम्या वेदमयी क्षमा गुणमयी दारिद्र्यविध्वंसिनी
सुप्रीता वरदा रमा सुनयना विष्णुप्रिया पद्मिनी ।
धर्मोद्धारकृतादरा सुहृदया दीनाश्रया मोदिनी
गम्भीरा कमलेक्षणा श्रुतिहिता धर्मोदया पातु नः ॥ [५]

पूर्णानन्दमयी यशस्सुखकरी तापत्रयोन्मूलिनी
पद्मा योगकरी मुकुन्ददयिता विश्वप्रिया क्षेमदा ।
सर्वारिष्टनिवारिणी सुफलदा सर्वेश्वरी सर्वदा
श्रीरित्यन्वहं आदरात् पठति योऽपायात् स संरक्ष्यते ॥ [६]

लक्ष्मीषट्कमिदं ददाति पठतां सद्यः फलं स्वेप्सितं
आम्नायान्त पुराण सूक्तविहिता नामावळिः श्रेयसी ।
सैषेति स्तवरूपतो व्यरचयत् गोपालसूरिर्मुदा
नाम्नां अष्टपरां शतीं समुचितां षट्श्लोकतोऽपूरयत् ॥ [७]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्री नाथमुनिस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

समग्रभक्तियोगाय ज्ञानवैराग्ययोगिने ।
नामांसि नाथमुनये लब्धसर्वार्थसम्पदे ॥ [१]

यदुपज्ञ मशेषवैष्णवश्रीः प्रथिता योगरहस्यविच्च येन ।
शठकोपमुनिर्विलोकित स्तं विबुधं नाथमुनिं नमामि नित्यम् ॥ [२]

यस्मिन्नन्वय ईश्वरो मुनिरिति ख्यातो द्विजन्मोदभूत्
पुण्ये श्रीशठमर्षणाभिधकुले तस्य प्रजज्ञे सुतः ।
नाम्ना नाथमुनि स्सनाथयति नो योऽद्यापि भाग्याधिकान्
तं श्रीवैष्णवतन्त्रकर्शिन महं नौम्यन्वहं योगिनम् ॥ [३]

भाग्योत्तरे शोभकृदाख्यवत्सरे श्रीवीरनारायणभासुरे पुरे ।
द्वन्द्वे त्वनूराध उडुन्यहीने योऽवातरत्तं प्रणमामि भक्त्या ॥ [४]

राकाधिकः कान्ततनुः स्वकाले चौलादिभिः कर्मभि रात्ततेजाः ।
सर्वाणि सामान्यविशेषशास्त्राण्यधीत्य रेजे विदुषं भजे तम् ॥ [५]

तारुण्यपूर्णे वयसि श्रिते यः कारुण्यपूर्णामरविन्दवल्लीम् ।
आत्मानुरूपां परिणीय यस्यां लेभे सुतं हीश्वरमाश्रये तम् ॥ [६]

कुर्वन्नात्मज मात्मधर्मनिरतं तत्वोपदेशोत्सुकः
स्वार्चामूर्तिं ममुं समर्च्य वरदं श्रीवीरनारायणम् ।
तत्वं वेदशिरोनिगूढ मनघं यो बोधयन्नन्वहं
शिष्येभ्योऽतिमुदा निनाय समयं सर्वं त मासेवये ॥ [७]

अर्चावतारमहिमातिशयानुरूपाः
सौलभ्यमुख्यगुणभूषणभासुरा स्ताः ।
दिव्यस्थलेष्वनुबुभूषरुदात्तमूर्तिः
यः प्रस्थित स्स्वजनयुक्त उपाश्रये तम् ॥ [८]

गत्वोदीचीदिशास्थान्यनुपमसुषुमाबन्धुराण्युत्तमानि
स्थानान्यासेव्य सम्यक् भगवत इतराण्यादान्मोदमानः ।
भक्त्या रूपाण्यपूर्वाण्यखिलजनमनोनेत्रहारीणि वीक्ष्य
प्राचीनाचार्यनिष्टासरणि मभिनतोऽस्म्यस्मदुत्तारकं तम् ॥ [९]

स्वप्ने चाज्ञापितो य स्सपदि भगवता वीरनारायणेन
क्षेत्राधीशानुमत्या पुनरपि महिता माजगामात्मभूमिम् ।
तत्वोद्बोधेन कालं सकलमपि नयन् पूर्ववत् यस्थित स्तं
तत्तत्तीर्थाधिवासप्रमुदितमनसं चिन्तये नाथ मन्तः ॥ [१०]

यात्रार्थिनः कतिचिदाययु रालये ते
नारायणस्य सविधे जगुरैशगाधाः ।
आरा विति द्रविडसूक्तिनवैकयुक्ताः
श्रुत्वाद्भुता झडिति ताश्च विवित्सु राह ॥ [११]

एतादृशीः श्रुतिमनोहरभावबन्धाः
  गाधासहस्रघटिता इति भान्ति नूनम् ।
भो वैष्णवाः करुणया वदताखिला मे
  धन्योऽस्म्यतो नु श्रुणवा इति तं नमामि ॥ [१२]

गाधासहस्र मखिलं तु वयं न विद्मः
  गायेम चेत् दशक मेक मिदं न चान्यत् ।
नैवास्मदीयपुरवासिषु कोऽपि वेत्ति
  ग्रन्थोऽपि नेत्यकथि यं प्रति तैः श्रये तम् ॥ [१३]

तीर्थप्रसादे समवाप्य पश्चात्
  देवाय विज्ञाप्य गतेषु तेषु ।
एष प्रवन्ध क्व लभेत मेऽद्यो-
  त्याशागृहीतो य उपास्महे तम् ॥ [१४]

हृद्या इभा वकुळभूषणयोगिवाचः
  तज्जन्मदातृ कुरुकापुरमेव गत्वा ।
पृच्छामि तत्र यदि लभ्यत इत्यवेत्य
  प्रातिष्ठतानुपद माकलये मुनिं तम् ॥ [१५]

शठारिनगरीपतिं वकुळभूषणं चादरात्
 प्रणम्य सुचिरं स्थित स्तदनु तत्र कञ्चित् द्विजम्।
पराङ्कुशपदाश्रयं समभिवन्द्य तस्मै तदा
  निजागमनकारणं त्वकथयन्मुदा तं भजे ॥ [१६]

लुप्ता दिव्यप्रवन्धा वकुलधरमुनिप्रेष्ठवक्राब्जनिर्यत्
वाणीपीयूषधाराधरणिसुरवरास्वाददूरा बभूवुः ।
किन्तु श्रीकण्णिनुण्णि त्यतिशयमहिता द्व्यष्टपद्यातिहृद्या
गीतिः माधुर्यधुर्या मधुरकवि कृता गीयतेऽत्रत्यविप्रैः ॥ [१७]

द्वादशसहस्रवारं गायन् गाथा लभेत संसिद्धिम् ।
शिष्टजनश्रुतिरेषेत्युत्तरवचसा मुमोद तं वन्दे ॥ [१८]

हर्षप्रकर्षभरितः प्रणमन् द्विजं तां
अध्यापयाद्य कृपयेति च याचमानः।
योऽधीतवांश्च मधुरोक्तितती: प्रसन्न-
चित्तो बभूव सततं मुनिमानतोऽस्मि ॥ [१९]

प्रवन्ध मतिसुन्दरं मधुरसूरिगीतं मुनिः
जगावथ शठारि रप्यतनुवाच मूचे मुदा ।
निवेदय कि मीप्सितं त्विति ततो भवत्सूक्तयः
मदीयरसनावशा स्स्युरिति तं ययाचे स्तुवे ॥ [२०]

दिव्यप्रबन्ध मखिलं हि चतुस्सहस्र-
कल्पं गुणोत्तर मपूर्वरसप्रधानं ।
अष्टाङ्गयोगविषयं च रहस्य मिष्टं
जग्राह योगविधित स्त मुपैमि नाथम् ॥ [२१]

आचार्या ब्रह्मनन्दिप्रभृतय उदिता आदिकाले युगस्य
त्रय्यन्तानां यथासन् शठमथनमुनिश्चापि यस्यात्मभाग्यात् ।
आचार्योऽभूच्च योगे प्रतनमतविदाचार्यमालाद्यमूर्तिः
श्रीमद्रामानुजार्यप्रथितगुरुगुरोः तात मीड्यं नमामि ॥ [२२]

रमानियोगात् कुरुकापुरीशः पदात् परस्मात् अवतीर्य यस्मै ।
द्वयं तथा योगरहस्यमाह नाथाय तस्मै मुनये नमोऽस्तु ॥ [२३]

कञ्चित् कालं वसन् य श्शठरिपुनगरे बोधयन् आत्मतत्वं
तत्रत्येभ्यः पुनश्च स्वनगर मुपयातोऽध्वदिव्यस्थलानि ।
गत्वा संसेव्य कुर्वन् भगवत उदितं मङ्गलाशासनं च
सत्कालक्षेपसक्तः सुजनपरिणुतः तं प्रपद्ये मुनीन्द्रम् ॥ [२४]

कदाचित् आहूय च भागिनेयौ
अध्याप्य यत्ताः शठकोपसूक्तीः ।
युवां इहाध्यपयतं श्रितेभ्यः
भक्त्येति यस्तं प्रणमामि नाथम् ॥ [२५]

यो दिव्यनादानुगुणानुगीत-
क्रमेण लोके प्रकटीचकार ।
ततो जना नादमुनीत नाम्ना
समाह्वयन् तं प्रणमाम्यभीक्षणम् ॥ [२६]

गानयोगशास्त्रचातुरी मवेक्ष्य चोळराट्
आह्वयत् तिरश्चकार यो विरक्तिभूमिराट् ।
विश्वसृट्प्रभृत्यपारभूतय स्तृणीकृताः
येन तं नमामि नाथयोगिनं सदा मुदा ॥ [२७]

शिष्यान् अष्टौ हि शिष्टान् श्रयणगुणयुतान् पुण्डरीकाक्षमुख्यान्
भाग्यात् योगैकलब्धद्रविडनिगमगत्र्येकसाहस्रपद्यैः।
हृद्यैः अध्याप्य धीमान् जगति बुधवरान् यश्च कृत्वा मुमोद
श्रेष्ठं योगैकनिष्ठं जगदवनचणं तं मुनिं नौमि नाथम् ॥ [२८]

अष्टाङ्गयोगक्रमं आप्रयोगं शिष्याय तस्मै कुरुकावलाय ।
उपादिशत् योगरहस्यं उर्व्यां प्रचारयेत्याह त माश्रयेऽहम् ॥ [२९]

आहूयात्मजं ईश्वरं तव सुतो मे पौत्र उत्पत्स्यते
नाम्ना यामुन इत्युपाह्वय च तं तस्मै सरोजेक्षण ।
सर्वान् दार्शनिकान् समाहितमना अर्थान् मुदोपादिशे-
त्यादिश्याविशति स्म योग मनघं नाथं मुनिं तं भजे ॥ [३०]

मृगविहृतये चोळाधीशे प्रयात्य च काननं
परिजनयुते प्रत्यायाते स्वपत्तनं अध्वानि ।
मुनिवरसुते तातं प्रत्याहतुः पित आगताः
गृहमधि धनुष्मन्तौ एकः कपिः तरुणी च नः ॥ [३१]

निशम्यैतां वाचं सपदि हृदि रामः तदनुजः
धराजाता याताः स्युः इह पवमानात्मज इति ।
ब्रुवाणः तन्मार्गानुगतिहृदयः यः स्वगृहतः
प्रतस्थे भक्त्या तं सकलजननाथं मुनिं अये ॥ [३२]

अत्यन्तदूरं अनुधाव्य च यो न लेभे
अन्तर्हितं तं अवलोकितुकाम एव ।
योगेन भूय अनुभूय तदेकयोगः
भेजे य उत्तमपदं मुनि माश्रये तम् ॥ [३३]

श्रीमान् नारायणो नः पतिः अमितद्वयः तादृशो नैव चान्यः
साक्षात् मोक्षप्रदाता भवति च पुरुषार्थ स्स एवेति बोद्धम् ।
बन्धुः दिव्यप्रवन्धः परमपुरुषसंवन्धवान् नान्य आस्ते
इत्यावेद्याधियोगं स्थिति मुपदिशतात् योगतो योगमर्म ॥ [३४]

इत्थं नाथमुनिप्रभावकलितां योगानुबन्धां स्तुतिं
योगादेव सुगीतवान् सुललितां गोपालसूरिर्मुदा ।
एतां ये गुरुभक्तिसक्तमनसः नित्यं पठन्त्यादरात्
ते यान्त्यात्महितैकयोग मचिरात् सर्वार्थदं मङ्गळम् ॥ [३५]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्रीमन्निगमान्तमहादेशिकवैभवशतकम्

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः ।
वेदान्तदेशिकमणिः सन्निधत्तां सदा हृदि॥

यदाकृत्या घण्टा वृषगिरिपसङ्कल्पविहिता
कुले वैश्वामित्रे सदयमुदयं प्राप भुवने ।
सदारामं विश्वप्रियमतिविरक्तं तमनघम्
गुरुं वेदान्तार्यं सुचरितमुपासेऽनवरतम् ॥ [१]

नभस्यश्रोणायां विबुधजनभाग्यात् समुदितः
सुतोऽनन्तार्यस्य प्रथितगुणभूमा कविवरः ।
नुतः काञ्च्यां सर्वैरपि च वरदेनाहितमतिः
गुरुं वेदान्तार्यं तमहमनिशं यामि शरणम् ॥ [२]

यस्यानन्तार्यसूरिः व्यतनुत विहितं जातकर्मादि तातः
तोतारम्बाहृदब्जं विकसितमभवत् यस्य लीलाविलासैः ।
बन्धुं विश्वस्य सन्तं सकलनिगमवाग्बन्धुमानन्दसिन्धुम्
वन्दे वेदान्तसूरिं भवजलधितरिं श्रेयसामाकरं तम् ॥ [३]

संसारार्णवमग्नमादृशजनोत्ताराय योऽवातरत्
अङ्घ्रिभ्यामवनौ चचार विबुधोत्तंसोंऽहसां ध्वंसकः ।
श्रीरामानुजसम्प्रदायमनघं संस्थाप्य सर्वार्थदम्
श्रीमद्वैष्णवसन्ततिं सुविशदं योऽवर्धयत्तं भजे ॥ [४]

चूडाकर्म चकार यस्य जनको वर्षे तृतीये शुभे
विद्यारम्भनिदानमक्षरचयं सामोदमन्वग्रहीत् ।
बालं वारिजनेत्रपौत्रममलं श्रद्धानिधिं तं गुरुम्
प्रत्युत्पन्नमतिं नमामि महितं वेदाञ्चलार्यं सदा ॥ [५]

आत्रेयेण च मातुलेन सहितो रामानुजार्येण यः
वात्स्यश्रीवरदार्यसन्निधिमगात् बाल्ये कदाचित् सुधीः ।
प्राचार्यस्य कृपाकटाक्षमहितं त्रैविद्यमान्यो भवे-
त्याशीर्वादमवाप्य मङ्गलनिधिः रेजे तमेवाश्रये ॥ [६]

तातोऽनन्तगुणोज्वलो बुधवरोऽनन्तार्यसूरिर्मुदा
प्राप्ते चाष्टमवत्सरे गुणनिधेर्यस्याकृतोपायनम् ।
प्राज्ञो ब्रह्मविदुत्तमस्समभवत् यो ब्रह्मचर्योऽज्वलः
आम्नायान्तगुरुं तमन्वहमहं श्रेयोऽम्बुवाहं भजे ॥ [७]

आम्नायानखिलान् स्वमातुलकृपाभूम्नाग्रहीत् यः तदा
सर्वोपादृतवेदपाठपुनरुच्चारानपेक्षो बभौ ।
तत्तादृङ्गतिमान् स्वधर्मनिरतः स्वाङ्गान् समग्रान् दधौ
तं विद्यानिधिमागमाञ्चलगुरुं विद्याधिगत्यै श्रये ॥ [८]

कन्यां मान्यकुलोद्भवां अनुपमां रूपादिसल्लक्षणैः
युक्तां श्रद्धधतीं क्रियासु विमलास्वाजानशुद्धां शुभाम् ।
स्तुत्यां यः परिणीय शास्त्रविहिते रेमे गृहस्थाश्रमे
तं वन्दे निगमान्तदेशिकमहं सत्कर्मसंसिद्धये ॥ [९]

विंशत्यब्दवयःप्रमाणसमये सन्दर्शनीयोऽखिलैः
मीमांसादिसमस्तशास्त्रविंशदप्रज्ञो बभौ यो गुरुः ।
त्रिंशद्वारममोघवाग्विलसितैः श्रीभाष्यमाश्रावयत्
तं तत्वैकनिकेतनं श्रुतिशिरस्सूरिं भजाम्यन्वहम् ॥ [१०]

श्रीरामानुजदेशिकोत्तममणेः आत्रेयगोत्राञ्चितात्
संप्राप्यामलवेदशीर्षयुगलं मन्त्रं च गारुत्मतम् ।
गत्वाहीन्द्रपुरीं ततो मनुमिमं ध्यायन् सुपर्णं श्रितः
तुष्टेनाप च तेन यो हयशिरोमन्त्रं तमाभावये ॥ [११]

योगी ज्ञाननिधिः विरक्तिमहितो भक्त्युज्वलो यो गुरुः
ध्यायन्नोषधभूधरे नरहरेः पार्श्वे तुरङ्गाननम् ।
आनन्दाश्रुविलोचनो विरुरुचे लालासुधाप्यायितम्
यं चक्रे सुविबोधहेतुममलं तं भावये देशिकम् ॥ [१२]

स्तोत्रं वाजिमुखस्य यो व्यरचयत् सर्वाभिरामं तथा
पक्षीन्द्रस्य समस्तसिद्धिफलदां पञ्चाशतं चाद्भुताम् ।
तत्तद्देवकृताज्ञया सुमनसां प्रीत्यै च पञ्चाशतम्
देवाधीशितुरच्युतस्य शतकं तं देशिकेन्द्रं भजे ॥ [१३]

गाधां रत्नत्रयेद्धां नवमणिरुचिरांडोळिकागाधिकां च
  गाधां कन्तुप्रधानां सुललितघुटिकागाधिकामप्यपूर्वाम् ।
कौबेराक्षिप्रमोदोद्वहन सुमधुरां हास्ययुक्तां च गाधाम्
  सर्वालङ्कारसूतिं व्यतनुत कुशलो यस्तमाचार्यमीडे ॥ [१४]

तत्रैव प्रतिपक्षभङ्गमपरं चक्रेऽद्भुतं यो मुदा
  गद्यं राघवपुङ्गवस्य मुरळीलोलस्तुतिं चेष्टदाम् ।
मन्दामन्दविबोधनैकनिपुणं तं सर्वविद्याचणम्
  श्रीमद्वेङ्कटनाथदेशिकमहं सेवे पुमर्थप्रदम् ॥ [१५]

तस्मात् गोपपुरीमवाप्य सुभगां देहळ्यधीशं च यः
  स्तुत्वा सम्यगुदारधीविलसितैः पद्यैस्सदामोदकैः ।
काञ्चीं तामुपगम्य तत्र वरदं देवैस्सदाभिष्टुतम्
  संसेव्याथ निजं निवासमगमत् तं भावये देशिकम् ॥ [१६]

हृद्यां श्रीचिह्नमालां प्रपदनमहितां गाधिकां द्वादशाढ्याम्
  गाधां भाषाप्रक्लृप्तां अनितरसुलभां यो वितेने विचित्राम् ।
चर्यामाचार्यजुष्टां व्यरचयदुचितां पञ्चकालात्मकान्ताम्
  तं त्रय्यन्तार्यवर्यं सुमनसमनघं संश्रयेऽनन्यभक्त्या ॥ [१७]

यस्स्तम्बेरमशैलवैभवमथो गाधार्थपञ्चार्थकम्
  गम्भीरां स्तुतिमष्टवाहुविषयां रम्यं नृहर्यष्टकम् ।
चक्रे भव्ययथोक्तकारिविषयं स्तोत्रं यथोक्तक्रियः
  वेदान्तार्यमहं भजामि विबुधोत्तंसं गुरुं तं सदा ॥ [१८]

यो दूरिकृतवान् श्रितान्धतमसं दीपप्रकाशस्य च
स्तुत्या सङ्गरपुङ्गवस्य महितं स्तोत्रं व्यधाद्वीर्यदं ।
हेतीशस्तुतिं आयुधस्तुतिवरां आस्वादनीयां बुधैः
विद्वद्बृन्दसमीडितं श्रुतिशिरोभूषं दधे चेतसि ॥ [१९]

मध्येकाञ्चि करीन्द्रशैलतिलकं नित्यं स्तुवन् आर्तिहम्
देवादेशमुदीरयन् भुवमिमां वैकुण्ठमेवाकरोत् ।
सद्भ्यश्चोत्तममर्थजातमखिलं यो बोधयन् तैर्नुतः
निन्ये कालमुपासिषीय विबुधं तं देवचूडागुरुम् ॥ [२०]

काञ्च्या निर्गत्य शिष्यैस्सह शुभचरितैः शेषशैलं प्रयातः
तत्रत्य स्वामितीर्थे सुकृतिपरिचिते नित्यकृत्यं समाप्य ।
सम्पश्यन् श्रीनिधिं यः पुलकितवपुरापादचूडं तदीयैः
कारुण्याम्भोधिविचीसहचरनयनान्तैश्च दृष्टस्तमीडे ॥ [२१]

शेषाशेषाननाभिष्टुति महितसुधास्यन्दिसूक्तिप्रकर्षाम्
वैदुष्यस्वर्णवीक्षाविरचितनिकषप्रस्तरां स्निग्धगुम्भाम् ।
श्रेयस्सूतिं बुधानां स्तुतिमकृत कविर्यश्च भव्यां दयायाः
वाणीविश्रान्तिभूमिं श्रुतिशिखरगुरुं तं भजेऽनन्यचेताः ॥ [२२]

विष्णोः स्थानानि गत्वोत्तरदिगुपगतान्यध्युवासात्तभूमा
तत्तत्क्षेत्राधिदेवान् व्यनमदतिमुदा भक्तिकम्रोऽथ मत्वा ।
क्षेत्राण्यन्यानि लोके नहि नहि समतां यान्ति काञ्च्येति भूयः
स्वक्षेत्रं प्राप यस्तं प्रविमलमनसं वेदचूडार्यमीडे ॥ [२३]

काञ्च्यामाचार्यवर्ये निवसति च कुदृमस्करी कश्चिदेतम्
वादार्थं त्वाह्वयत् सप्रविमलवचसा लीलया तं जिगाय ।
तादृक् ज्ञानामृताब्धिं तदनु सुविदितो मानयन् दिव्यशक्तिम्
विद्यारण्यो वरेण्यः स्तुतिपरमलिखत् यस्य पत्रं भजे तम् ॥ [२४]

पद्यैः प्रैषयदञ्जसा प्रतिवचस्तस्मै विरक्तयुन्मुखैः
सोऽप्येतं विविधैः क्रमैः सुविदितो मेनेऽवतारं हरेः ।
वैराग्यैकनिधिं तृणीकृतमहीपालं त्वनन्याश्रयम्
वेदान्तार्यमपारधीजलनिधिं तं वादिसिंहं भजे ॥ [२५]

श्रीरङ्गेश्वरशासनं बुधवरैः सम्प्रेषितं मानयन्
वाद्युन्मादमपोह्य सत्पथमुपादेष्टुं तदा प्रस्थितः ।
कावेर्या विधिवद्विधाय सकलं नित्याह्निकं दर्शनम्
देवस्याकृत यस्तमेमि भगवद्ध्यानात्तसोपानतः ॥ [२६]

श्रीरङ्गेशकृपाकटाक्षमहितः सम्प्राप्य सद्भूषिताम्
आस्थानौमजयच्च वादिनमहंकारोद्धतं प्रज्ञया ।
तत्काले शतदूषणीं व्यरचयत् सिद्धान्तसंरक्षिणीम्
यस्तं देशिकमाश्रये कविमणिं वादीभपञ्चाननम् ॥ [२७]

गोष्ठ्यां श्रीरङ्गनेत्रा सबहुमतिसुधीवृन्दविद्योतमानः
मध्येरङ्गं वसात्र श्रुतिशिखरयुगार्थप्रवक्तेति भूत्वा ।
आदिष्टो हृष्टचेताः कतिचनदिवसानर्थमाम्नायगूढम्
सद्भयोऽभीष्टं प्रवक्ष्यन्नवसदधिपुरं यस्तमार्ये प्रपद्ये ॥ [२८]

वेदान्तद्वयमत्र रङ्गसविधे प्रख्यापयन् सत्कृतीः
 व्यातन्वन् वसतात् त्वमित्यभिधे स्वप्ने यतीन्द्रस्स्वयम्।
यस्मै रङ्गहृदन्तरङ्गितहृदे सौभाग्यमातन्वते
 योगीन्द्राङ्घ्रिपयोजभृङ्गमिह तं वन्दे मुकुन्दप्रियम् ॥ [२९]

दृष्ट्वा श्रीरङ्गनेता सदसि च निगमव्याक्रियानैपुणीं ताम्
 वेदान्ताचार्यसंज्ञां व्यतरदतिमुदा यस्य विद्याधिनेतुः ।
यस्मै यं रङ्गनेत्र्यप्यजगणदवनौ सर्वतन्त्रस्वतन्त्रम्
 त्रय्यन्तार्यं तमीड्यं जनिपथरुगदङ्कारवर्यं प्रपद्ये ॥ [३०]

योगक्षेमैकहेतुं सकलतनुभृतां विश्वसौभाग्यधेनुम्
 सद्भिर्नित्यानुभाव्यां प्रसदनमहितां सर्वलावण्यपण्याम् ।
देवीमस्तौद्धरित्रीं सरसिजनिलयां चोद्धरित्रीं भवाब्धेः
 यो लक्ष्मीवीक्षितान्तहृदयसारसिरजस्तं श्रये वेङ्कटेशम् ॥ [३१]

नीळायास्तुतिमद्भुतां सुमधुरां गुण्यां गभीरार्थदाम्
 देवेशस्य दशावतारमहिमादर्शां स्तुतिं चादरात् ।
भक्ताभीष्टफलप्रदां व्यरचयत् नित्याभिगेयां शुभाम्
 यस्तं शान्तिदद्यादिभूपमनिशं वेदान्तसूरिं भजे ॥ [३२]

क्षान्त्यौदार्यगुणोज्वलो बुधवरैरभ्यर्थितो यो गुरुः
 श्रीरामानुजसंयमीन्द्रविजयोत्तंसां व्यधात् सप्ततिम् ।
तं योगीन्द्रदयैकपात्रमखिलप्रत्यर्थिवित्रासिनम्
श्रीमद्वेङ्कटनाथमस्मदवनार्थात्तावतारं भजे ॥ [३३]

चित्रं शुद्धं विधार्यं सहृदयहृदये तत्वसन्दर्शनेद्धम्
स्निग्धं गम्भीरभावं सकलकुशलदं स्रग्धरावृत्तक्लृप्तम् ।
सार्वज्ञ्याभिप्रकाशं कृतिमणितरलं तत्वमुक्ताकलापम्
व्यातेने यस्तमभ्येम्यसदृशकृतिनं सर्वतन्त्रस्वतन्त्रम् ॥ [३४]

संसाराब्धिनिमग्नसाधुजनतासंरक्षणैकव्रती
रम्यं सारविवेचकाधिकरणादर्शं च सारावळिम् ।
मीमांसापदक्षिणीं च रुचिरां यस्तत्वटीकां व्यधात्
तं वेदान्तगुरूत्तमं प्रणिपताम्याजानशुद्धं विभुम् ॥ [३५]

तात्पर्यज्योत्स्निकां यं कुदृशमततमः कर्शिनीं सुप्रसिद्धाम्
श्रीगीताभाष्यभावोदधिमथनसुधापूर्णचन्द्रो वितेने ।
संख्यावद्विश्वरक्षाकरणपटुमतिः वादिगर्वापनेता
तं त्रय्यन्तार्यवर्यं कविकथकहरि संश्रयेऽनन्यचेताः ॥ [३६]

सर्वाभीष्टार्थसिद्धिं सकलविबुधजीवातुमादर्शनीयाम्
चक्रे सर्वार्थसिद्धिं तदनुकृतिमणिं न्यायसिद्धाञ्जनं च ।
आम्नायान्तानुसारात् विमतपरिहृतेः न्यायशुद्धिं च नव्याम्
यः श्रीवेदान्तसूरिः तमहमनुकलं भावयाम्यन्तरङ्गे ॥ [३७]

गम्भीरार्थप्रकाशां विकसितसुमनोवासितां योऽतिरम्याम्
मुख्यामीशाधिवास्यां अकृतकवचनोत्तंसितां व्याचकार ।
संसाराग्निप्रदीप्तिव्यपगततनुभृत्प्राणसञ्जीविनीं तम्
संसेवे वेदचूडागुरुवरमनिशं सर्वतन्त्रस्वतन्त्रम् ॥ [३८]

चक्रे यः पञ्चकालक्रमविधिमहितां पाञ्चरात्राभिरक्षाम्
तद्रीत्यैवाचरन्तं स्वपरहितपरं चाश्रितैः कारयन्तम् ।
श्रीमद्गीतार्थसङ्ग्राहकपरमकृतेः यामुनेय्याश्च रक्षाम्
कुर्वाणं चिन्तयामि प्रथितकविघटापञ्चवक्त्रं प्रगल्भम् ॥ [३९]

प्राप्तः कैश्चिद्विरोधः कुनयमतियुतैः शङ्खचक्राङ्कनादेः
सर्वास्तान् खण्डयित्वा निजपथमनयत् सच्चरित्रस्य रक्षाम् ।
व्यातानीत् वेदसम्मत्युपचितमहिमोत्कर्षमुर्व्यां सुधीन्द्रः
तं वेदान्तार्यवर्यं हयमुखदयितं देशिकेन्द्रं प्रपद्ये ॥ [४०]

बाह्याभ्यन्तरपश्यतोहरकृतां बाधां समुत्सादयन्
निक्षेपस्य समग्ररक्षणकृतिं रक्षां रहस्यस्य च ।
चक्रे यः कवितार्किकद्विपहरिः त्रय्यन्तपारङ्गतः
वन्दे तं गुरुवादिहंसमुदिराचार्यान्तरङ्गं गुरुम् ॥ [४१]

व्याचष्ट न्यासविद्याविवृतिसहकृतां न्यासविंशत्यभिख्याम्
तद्वन्न्यासप्रधानं निरवधिफलदां रङ्गनाथातिहृद्याम् ।
श्रुत्यन्तोद्भासमानां तिलकपरगतां न्यासपूर्वा कृतिं यः
व्यातेने न्यासयुक्तं दशकमपि गुरुः तं शरण्यं प्रपद्ये ॥ [४२]

पौराणिक्यैव रीत्या सकलसुमनसां वोधनार्थ परार्थम्
ग्रन्थं भूगोळनिर्णायकमथ सहितं व्याख्यया यश्चकार ।
सर्वत्रैवं यतीन्द्रप्रवरफणितितात्पर्यमुर्व्यां प्रवक्ष्यन्
जेजीयात् देशिकेन्द्रस्त्वयमिति विबुधैः प्रार्थितश्चाश्रयेतम् ॥ [४३]

विद्यारण्यस्य वादोह्यभवदनुपमः सार्धमक्षोभ्यनाम्ना
  राजा वादोक्तिमालां श्रुतिमकुटगुरोः अन्तिकं प्रैपयत्ताम्।
तत्सर्वं वीक्ष्य सूरिः निरणयदसिना तत्त्वमस्युक्तिनाम्ना
  विद्यारण्योत्तयरण्यं विदलितमिति तं पूर्णविद्यं प्रपद्ये ॥ [४४]

सन्दृप्तः कृष्णमिश्रः स्वरचितकृतिना जेतुमार्यं यदागात्
  सर्वज्ञः तद्विदित्वा व्यतरदथ च संकल्पसूर्योदयाख्यम्।
दृष्ट्वा तं वीतदर्पः गुरुपदकमलन्यस्तमूर्धातिवृत्तः
  तादृग्विद्वत्प्रगल्भं त्वघटितघटनादक्षमाभावये तम् ॥ [४५]

श्रीरामाभ्युदयं विधाय कविराट् लब्धुं यशो डिण्डिमः
  आगत्याथ यदूद्भवाभ्युदयतो मेने स्वयं निर्जितः ।
स्तुत्वा तं कविवादिसिंहमनमत् भक्त्या ततो निर्गतः
  तं गाधेयकुलानुरूपचरितं वेदान्तसूरिं भजे ॥ [४६]

निष्क्रम्याथ वनाद्रिमुख्यसदनान्यन्यानि चारात् हरेः
  नत्वा श्रीकुरुकापुरीश्वरमथ श्रीरामसेतुं गतः ।
स्नात्वा तत्र पुनर्भवादिरहितस्थानाप्तिहेतौ मुदा
  भूयः प्राप भुजङ्गशायिसविधं यस्तं नमाम्यार्तिहम् ॥ [४७]

चोळेष्वप्रतिमानि विष्णुसदनान्यासेव्यभूयः स्वकाम्
  जन्मक्ष्मां समुपागतः करिगिरीशाधिष्ठितां मुक्तिदाम् ।
ध्यायन्नास हरिं प्रपन्नशरणं योगीन्द्रमुख्यार्चितम्
  नित्यं स्वाश्रितसाधुबोधनपरो यस्तं प्रपद्ये गुरुम् ॥ [४८]

कश्चिद्देशिकमेत्य कुण्डलिवशीकाराग्रणीः मान्त्रिकः
शक्तिं दर्शितवान् यदा गुरुवरः तार्क्ष्यं तदा संस्तुवन्।
मन्त्रग्रामविदञ्जसा तमजयत् सम्प्रार्थ्य सोऽपि क्षमाम्
यातस्तं सकलज्ञताप्रकटिनं वेदान्तसूरिं भजे ॥ [४९]

मन्त्रोपासक आगतो गुरुवरं त्वाप्लावकालेऽपरः
कृत्वा मन्त्रबलान्महोदररुजा ग्रस्तं जहासाधमः ।
ज्ञात्वा तत्क्षण एव तत्प्रतिमनुं तार्क्ष्यं जपन्नीरुजः
स्थूणारन्ध्रत एव तत् विषजलं प्रास्त्रावयत्तं भजे ॥ [५०]

भूयोनिर्गत्य काञ्च्या अहिपतिशयनं सन्दिदृक्षुर्बुधेन्द्रः
मध्यमार्गं वितस्थे विश उदवसिते कस्यचित् सोऽर्धरात्रे ।
भुङ्क्ते श्वेतस्तुरङ्गः तव मम चणकान् इत्युदीर्याथ दुग्धम्
प्रादात् यत्तन्निवेद्याप्यपिबदतिमुदा तं श्रये देशिकेन्द्रम् ॥ [५१]

निर्मायाहीन्द्रपुर्या स्वयमतिसुभगं केनचित् प्रार्थितोऽन्धुम्
तेनैवाभिष्टुतश्च प्रकटितमहिमा सर्वतन्त्रस्वतन्त्रः।
नीत्वैवं वासरान् यः कतिचनकृतधीः प्रस्थितोऽथानुरङ्गम्
तत्रावात्सीत् स्वगेहे तमहमनुकलं शीलयाम्यन्तरङ्गे ॥ [५२]

श्रीमान् सद्भिरुदीरितश्शमधनैः ज्ञानब्धिराकाबिधुः
तत्वानां चुलकं रहस्यचुळकं सद्रक्षणाय व्यधात्।
तत्वानां पदवीं रहस्यपदवीं सर्वोपसेव्यां च यः
सेवे तं श्रुतिमौलिदेशिकमणिं श्रीमाधवीश्रीपदम् ॥ [५३]

विष्णोर्हृद्यां रहस्यप्रथममणिगणं व्याकृतिं चातिरम्याम्
चक्रे यस्तत्वरत्नावळिमथ विवृतिं हृत्तमोनाशिनीं ताम् ।
श्लोकद्वन्द्वस्थितार्थप्रकटनसरहस्योत्तमाङ्गावतंसम्
वेदान्ताचार्यवर्यं धुतकलिकलुषं तं श्रये सत्यवाचम् ॥ [५४]

तत्वानां नवनीतमद्भुतरसं कृष्णस्य तन्मुष्णतः
तद्वद्रस्यमहो रहस्यनवनीतं चातिहृद्यं सताम् ।
तत्वोल्लासकरीं रहस्यमहितां यो मातृकां चादरात्
व्यातेने कविपुङ्गवो गुरुवरः तं प्रीणयाम्यन्वहम् ॥ [५५]

दिव्यं चाञ्जलिवैभवं बुधमनोलङ्कारमत्युज्वलम्
ह्यात्मोज्जीवकृते प्रधानशतकं तं सारसारं परम् ।
श्रीवैकुण्ठपदाधिरोहपदवीं यो निर्ममे निर्ममः
सेवे तं परवादिनागगरुडं त्रैविद्यचूडागुरुम् ॥ [५६]

संसार भजतां अनर्थबहुळं निस्सारमप्यादरात्
लोकानामभयप्रदं भयदमप्यत्युद्धतानां तथा ।
व्यातानीदभयप्रदानलसितं सारं पुमर्थप्रदम्
यस्तं देशिकमाश्रयेऽनवरतं प्रत्यर्थिशैलाशनिम् ॥ [५७]

प्रारभ्य प्रथमात् रमासहचरात् स्वाचार्यसीमावताम्
पूर्वेषामवरोहणक्रमगतां सत्सम्प्रदायस्य च ।
सम्मान्यां परिशुद्धिमातनुत यो रम्यां सतां श्रेयसे
तं वेदान्तगुरूत्तमं शमनिधिं वन्दे दयावारिधिम् ॥ [५८]

लक्ष्मीनाथकृतोपकारनिवहान् कारुण्यपूर्णोदयान्
जन्मावृत्तिनिवर्तकान् निजगुणावृत्तिप्रवृत्युन्मुखान् ।
यः प्राचीकटदाश्रितामरतरुः व्यक्तेऽपकारिण्यपि
सन्त्यक्तापकृतीः अहो ह्युपकृतीः कुर्वन्तमन्तर्दधे ॥ [५९]

सारासारपयोनिधिप्रमथनात् सारार्थजातं गुरुः
सङ्गृह्णन्नथ सारसङ्ग्रहसमाख्यातां कृतिं निर्ममे ।
संसारातिविरक्तसाधुजनतासन्त्राणनित्यव्रती
कंसारातिपदाम्बुजातमधुपो यस्तं श्रये देशिकम् ॥ [६०]

श्रीरङ्गे भोगितल्पं त्वभिगमनमुखैः अर्चयन्नन्वहं यः
साधुभ्यः स्वप्रवन्धान् जलनिधितनयाप्रेयसोऽतिप्रियां श्च ।
व्यावृण्वन्नध्यवात्सीत् निखिलकुमतितामिस्रचण्डप्रभावान्
भक्त्या तं वेदचूडागुरुवरमनिशं चिन्तयाम्यन्तरङ्गे ॥ [६१]

स्वच्छात्रब्रह्मतन्त्राभिधवरमुनये ब्रह्मवित्तन्त्रवेत्रे
प्रीत्या यो वेदचूडायुगलमभिदधे सर्वतन्त्रस्वतन्त्रः ।
तं प्रज्ञासिन्धुमन्धन्तमसमपनयन्तं बुधाम्भोजसिन्धुम्
वाचां धाराभिरासेचनकमभिरुचं देशिकेन्द्रं नमामि ॥ [६२]

सम्यग्भक्तिमुपेयुषां निजपदद्वन्द्वैकरक्षावताम्
साधूनां श्रुतिभाष्यमाकलयता येनानघं द्विश्शतम् ।
प्रीत्याफणि फणीन्द्रशायिकरुणावेणीसमाप्लाविना
भक्त्या तं कलये निरन्तरमहं वेदान्तसूरिं गुरुम् ॥ [६३]

शिरसि निगमचूडादेशिको योऽतिभक्त्या
हरिपदरसिकानां पादरक्षां दधार ।
दुरितहरणरक्षा तद्गुरोः पादरक्षा
भवतु मम तु साक्षात् मस्तके पादरक्षा ॥ [६४]

श्राद्धे यस्स्वपितुर्न्यमन्त्रयदथो विप्रांस्तदानागतान्
दृष्ट्वा तत्समये स्मरन् हयमुखं प्रारब्धवांस्तत्क्रियाम् ।
भोक्त्राकारत आगता बुभुजिरे भुक्तिं च तृप्ता गतः
निष्प्रत्यूहं अकारयन्निति विदन् हृष्टो गुरुस्तं भजे ॥ [६५]

कश्चित् रत्नं च रुक्मं गुरुमनस उपादानकाले परीष्ट्यै
प्रादात् तत् देशिकेन्द्रः वहिरुदवसतेः प्राक्षिपत् सद्य एव ।
तं वैराग्यैकरत्नं मृदुपलकनकाद्यात्तसाम्यं निरीहम्
वेदान्ताचार्यवर्यं प्रसदनसुमुखं चिन्तयाम्येकतानः ॥ [६६]

अस्तावीत् हृद्यपद्यैः शतकदशमितैः प्रार्थितः कीर्तिपूर्त्यैः
श्रीरङ्गेशाङ्घ्रिरक्षानुतिततिमहितां निर्ममेत्वेकयामे ।
श्रुत्वा तां रङ्गनाथः कविकथकहरिस्त्वं भवेत्याह्वयत् यम्
स्तुत्यं सर्वैः स्तवीमि श्रुतिशिखरगुरुं तत्कृपालब्धसूक्त्या ॥ [६७]

व्याचक्रे मुनिवाहनस्य यमिनस्सूक्तिं सुधावर्षिणीम्
वाचाभिः हृदयङ्गमाभिरपरां सूक्तिं च तां माधुरीम् ।
प्रश्नानां महतां अनर्घवचसां भावान् स्फुटं व्यञ्जयन्
यस्तं वेदशिरोगुरूत्तममहं सञ्चिन्तयाम्यन्वहम् ॥ [६८]

आत्मारामा शठारेर्भगवदनुभवानन्दलीलैकलोलाः
 तादृग्भावास्तदीयानननळिनदळान्निर्गतास्सूक्तयश्च ।
तासां व्याख्या यदीया निगमपरिमळाभिख्ययाघ्रापिताभूत्
तत्तादृक्धीसुधाब्धिं निगमततिशिरोदेशिकं तं प्रपद्ये ॥ [६९]

चक्रे तात्पर्यरत्नावाळिमतिमधुरां स्निग्धगम्भीरभावाम्
 धार्या सद्भिश्शठारात्यनुभवसुमनोहारिसूक्तेश्च सारम् ।
सङ्गृह्य श्रीशपूजाक्रममवनिबुधैः प्रार्थितो निर्ममे यः
 संसेवे वादिसिंहं कविकुलतिलकं वेदचूडागुरुं तम् ॥ [७०]

कान्तोदन्तं पवनतनयात् संश्रुतं स्वप्रियायै
 कान्तोदन्तं रघुपतिरथो हंसतस्सन्दिदेश ।
इत्याशंसत्सरसवचनैः हंससन्देशरत्नम्
 वेदान्तार्यः कविकुलगुरुः यो व्यधात्तं नमामि ॥ [७१]

नीवीं तामतुलां सुभाषितवतीं रम्यां सदानन्दिनीम्
 सुश्लिष्टां सरसां परार्थकलितां यश्चाकरोन्निर्ममः ।
सन्देशं सरहस्यमादरकृतं तत्वार्थसन्देशिनीम्
 व्याख्यां चाश्रितमाधवात्मजपरित्राणाय तं भावये ॥ [७२]

प्रबन्धानां सारं निघसनियमं च द्वयमनोः
 मनोर्मूलस्यापि द्रविडवचनैः सङ्ग्रह्यथ ।
प्रसिद्धान्त्यश्लोकप्रविमलसदर्थस्य च मुदा
 व्यधात् यस्तं वन्दे द्रविडनिगमास्वादरसिकम् ॥ [७३]

श्रीमद्देवाधिनेतुस्सदयितहृदयस्यार्तिहर्तुः प्रसादात्
पुत्रं कारुण्यपात्रं सकलबुधमणिस्यूतिसूत्रं पवित्रम् ।
रोहिण्यां रङ्गपुर्यां नभसि समुदितं जातकर्मादिना यः
संस्कुर्वाणस्तदान्तर्मुमुद अविरतं भावये देशिकेन्द्रम् ॥ [७४]

पुत्रः पित्रा विधात्रा वरद इति मुदावाप येनाभिधेयम्
काले चैवोपनीत स्तदनु च सकलाम्नायजातं च लेभे ।
यस्माच्छस्त्राण्यधीतो यतिपतिवरसिद्धान्तशस्त्रध्वजोऽभूत्
तं वेदान्तार्यवर्यं शरणमनुकूलं यामि सूक्त्या च नौमि ॥ [७५]

ग्रन्थालोकनदत्तदृष्टिरथ तद्वीथ्यागतं लक्ष्मणम्
नाजानात् तदनु क्रुधा तदनुगाः पादौ चकर्षुर्गुरोः ।
अज्ञानात् कृतमित्युदीर्य विनमन् तं च क्षमां प्रार्थयन्
यद्देशान्निरगात् सदारतनयो यस्तं भजे देशिकम् ॥ [७६]

कावेरीतीरलोलं वरदमभिनमन् सत्यकल्याणपुर्याम्
सार्धं पुत्रेण दारैः विशदमुपदिशन् आश्रितेभ्यस्सदर्थान् ।
तत्रैवास्ते सुखेनेत्यवगततदुदारप्रवृत्तिः सदारः तु
आयातो लक्ष्मणार्यश्शरणमुपगतो यं तमार्यं प्रपद्ये ॥ [७७]

आयातं तमुदीक्ष्य देशिकवरः पृष्ट्वा च तत्कौशलम्
दुर्वर्णाप्तिनिदानमाधिहरणोपायं च बुध्वा तदा ।
स्वीयाङ्घ्र्यम्बुजवार्यधापयदथो तं नीरुजं चाकरोत्
सन्तानाप्तिवरं ददौ च कृपया यस्तं भजाम्यार्तिहम् ॥ [७८]

शिष्याणां दुरितं तदीयगुरुमप्याहन्ति निर्दोषिणम्
  हीत्याद्यार्यवचः कदापि वितथं नैवेति चोद्धोषयन् ।
साधुर्लक्ष्मणसूरिरप्यनुकलं यत्पादतीर्थं मुदा
  पायं पायमवाप पुत्रसुफलं यत्सेवया तं भजे ॥ [७९]

ध्यायन् रङ्गमनु प्रयास्यति गुरौ म्लेच्छैर्यदास्कन्दितम्
  श्रीरङ्गं नगरं वुधा श्च बहवो नष्टाश्च शिष्टास्स्वयम् ।
रङ्गत्राणपरायणास्तदनुगोप्यार्यस्तदापालयत्
  मा याहीति वचस्सुदर्शनकवेस्तं देशिकं संस्तुवे ॥ [८०]

आदौ येन सुदर्शनार्यकलिता श्रीभाष्यसुव्याक्रिया
  प्रख्याता श्रुतकाशिकेत्यभिधया कृच्छ्रेण संरक्षिता ।
सत्पात्रेषु नियोजिता च तदनु ब्रह्मोपदेशः कृतः
  याभ्यां यो सुरक्षितौ बुधसुतौ तं संश्रये देशिकम् ॥ [८१]

गत्वा यादवकाश्यपीधरवरं कल्याणतीर्थं गतः
  कृत्वा कृत्यमुदारधीः यतिपतिं संसेव्य यस्त्वादरात्।
आर्तत्राणपरायणं स्वशरणं नारायणं संश्रितः
  नत्वासेचनकं रमासहचरं हृष्टस्तमाभावये ॥ [८२]

पुत्राय संयमिमणीक्षणपात्रिताय
  तत्रैव यो द्रविडवेदशिरोऽर्थजातम् ।
मित्राय वादितमसो वरदाय सूरिः
  प्रीत्यादिशत्तमहमन्वहमाश्रयामि ॥ [८३]

आशास्य मङ्गलमनर्घमुदारगीर्भिः
तत्क्षेत्रसम्पदुपलब्धिनिधिं कुमारम् ।
तन्मङ्गलं पुनरवाप ततो निसृष्टः
यस्तं गुरुं प्रणिपतामि सदारसूनुम् ॥ [८४]

रम्यामत्यद्भुतार्थां परिचितसरसां रङ्गनाथाविहृद्याम्
जन्मानावृत्तिहेतुं दुरितविदलिनीं सर्वसौभाग्यदात्रीम् ।
शत्रून्मादापहर्त्रीमहिशयनहिताशासनाभीतिशंसाम्
चक्रे यो वेदचूडागुरुरुदितदयस्सन्ततं तं भजामि ॥ [८५]

श्रुत्वा गोपणभूमिपो यमनिभान् जित्वा तुरुष्कान् भुवि
श्रीरङ्गाधिपतिं स्वकीयविषये संस्थाप्य भूयः क्रमात्।
पूजां कारयतीति हर्षवचनं रङ्गं प्रति प्रस्थितः
यो दारैस्सह दारकेण च गुरुस्तं संश्रयेऽस्मन्निधिम् ॥ [८६]

प्रणवकृतविमानं भक्तवर्गान् पुनानम्
निखिलशुभनिदानं मुक्त्युपायैकतानम् ।
भुजगमधिशयानं वाञ्छितार्थान् ददानम्
व्यनमदथ युवानं यस्सिषेवे तमीडे ॥ [८७]

प्रणम्य रङ्गराजमात्मगेहमाप्य धीमताम्
प्रवर्तयन्मुदा स्वपादभक्तियुक्तचेतसाम् ।
त्रयीशिरोयुगं सदा सदारदारकस्स्तुतः
बभौ च यो गुरुर्महान् तमाश्रयेऽर्थिकल्पकम् ॥ [८८]

भाषागीतितदञ्चितार्चनविधीन् केचिन्न्यषेधंस्तदा
तान् सर्वानजयन्नृपस्य पुरतस्संस्थापयन् सत्पथम् ।
देवस्याध्ययनोत्सवान् प्रतिहतानाकल्पमव्याहतम्
यश्चाकारयदाश्रयामि सततं तं वेदचूडागुरुम् ॥ [८९]

काञ्च्यां कश्चिददूषयन्मतमथो रामानुजीयं यदा
वादे तं विजिगाय यो मुनिवरः श्रीब्रह्मतन्त्रोत्तमः ।
तादृक्छिष्यं उपाश्रितामरतरुं सौभाग्यरत्नाकरम्
वेदान्तार्यगुरुं भजाम्यनुदिनं तत्पादपद्म रमे ॥ [९०]

सारं कृत्वा रहस्यत्रयपरिकलितं सर्वलोकोत्पुनानम्
तत्वोदन्वत्प्रभूतं प्रविमलसुमनस्सारमात्मीयसारम् ।
श्रीमान्योऽधापयन्नो भवविषयजुषः संश्रितत्राणहेतोः
वन्दे तं वेदचूडागुरुमनवरतं तत्कृपालब्धवर्णः ॥ [९१]

तत्वार्थे विशदीकृतेऽपि च मतिभ्रान्त्यान्यथा मानवाः
सन्दिग्धा इति यो दयार्द्रहृदयः शङ्कानिवृत्यै सताम्।
शङ्कानां परिहारमाश्रितपरित्राणप्रवीणो गुरुः
व्यातेने कविवादिपञ्चवदनस्तं वन्दिषीयान्वहम् ॥ [९२]

शिल्पी पीठे स्वक्लृप्ते चतुरमतिरपि श्लेष्टुमार्यस्य मूर्तिम्
आरेभे तक्षितुं यत्तदभवदतुलं लोहितं तत्कपोले ।
स्वीयं वैदुष्यमुर्व्यां प्रहतमिति वदन् सर्वविज्ञं ववन्दे
शास्त्रं शिल्पार्थसारं व्यतनुत गुरुराट् यस्तदाभावये तम् ॥ [९३]

श्रीवेङ्कटेशवदनाम्बुजनिर्गतास्ताः
  को वा कृतीर्गणयितुं प्रभवेत् विपश्चित् ।
तत्रालभेककृतिरेव पुमर्थलब्ध्यै
  तादृग्गुरूत्तममयेऽहमनन्यभक्त्या ॥ [९४]

हरिदिनतिलकाख्यं श्लोकरूपं निबन्धम्
  हरिदिनकरणीयं नित्यकृत्यं प्रवक्तुम् ।
व्यरचयदनघं यो धर्मशास्त्रानुरोधम्
  हरिपदपरिचारार्थमासेवये तम् ॥ [९५]

ब्रह्मसूत्रनिर्मितिप्रतिष्ठितिप्रबोधिकाम्
  ब्रह्मसूत्रपूर्वकप्रतिष्ठितिं व्यधात् कृतिम् ।
ब्रह्मतन्त्रवित् स्वतन्त्र एव सर्वतन्त्रयुक्
  ब्रह्मतन्त्र संयमीन्द्रदेशिकं तमाश्रये ॥ [९६]

वैश्वदेवकारिकाकृतिं कृतिं लिलेख यो
  वैश्वदेवकर्मतत्प्रयोगरीतिदर्शिनीम् ।
दिव्यदेशमङ्गलप्रकीर्तनाय निर्मिताम्
  दिव्यसूक्तिमाह तं गुरूत्तमं भजे सदा ॥ [९७]

प्रीत्या रङ्गाधिनेतुः प्रसदनमहितः पुस्तकं ज्ञानमुद्राम्
  लेभे यश्चिह्नभूतं करकमलयुगे सर्वतन्त्रस्वतन्त्रः ।
वेदान्ताचार्यवर्यं शमदमकरुणाम्भोनिधिं ज्ञानराशिम्
  वन्दे तं वादिपञ्चाननमखिलगुरुं भक्तमन्दारमीड्यम् ॥ [९८]

आम्नायमौळिगुरुवर्य कृपाम्बुराशे
  घण्टावतार विनयोज्वल वादिसिंह ।
सर्वज्ञ संश्रितजनप्रिय सर्वमान्य
  श्रीवेङ्कटेश कविपुङ्गव संश्रये त्वाम् ॥ [९९]

रसयति रसना मे स्वादु नामामृतं ते
  स्मरति च हृदयं मे त्वत्कृतोदारसाह्यम् ।
प्रणमति मम मूर्धा त्वत्पदाम्भोजयुग्मम्
  परिणतमिह मे तत् भागधेयं सुधेयम् ॥ [१००]

जयति जगति वेदान्तार्यवर्यस्सुधीन्द्रः
  जयति सकलसेव्या तत्कृतोदारवाणी ।
जयति च वसुधेयं तत्पदन्यासधन्या
  जयति सुजनगोष्ठी तद्गुणानुद्गृणन्ती ॥ [१०१]

सवितृनिभशरीरे श्रीशघण्टावतारे
  श्रुतिसरणिविहारे वादिभङ्गातिधीरे ।
स्तुतिवचनविदूरेऽनन्तसूरेः कुमारे
  सहकृतसुतदारे भावना मेऽस्तु धीरे ॥ [१०२]

प्राचीनाचार्यवाचां समुचितपथसञ्चारलब्ध्या यथार्थान्
  बोद्धुं शक्तो धरित्र्यां अकृतकवचनोत्तंससूरेर्न चान्यः ।
अस्तीत्यालोच्य सम्यक् सुदृढमहमुदाराश्रयं तं प्रपद्य
  स्मारं स्मारं तदङ्घ्रिद्वयमनवरतं नौम्यहं तत्कृपां ताम् ॥ [१०३]

अबद्धोऽपि बद्धः सुबद्धोऽपि बद्धः
मदीयः प्रवन्धः सदा सन्निबद्धः ।
प्रवुद्धोऽत्र यश्च त्रयीशेखरार्य-
प्रमोदावहाङ्घ्र्यनब्जबद्धस्समिन्धे ॥ [१०४]

अनन्तसूरिसू नुरत्युदारधीस्सदाश्रयात्
निरन्तरं हरि भजन्नवाप विश्ववैभवम् ।
तदाश्रयात् सदाश्रयस्तदीयवैभवं जगौ
स गोपबालकः कृतिं समर्पयच्च तत्पदे ॥ [१०५]

समासु सर्वासु सतीषु भाग्यात्
समान्वभूत् यद्विभवोऽतिवैभवम् ।
ततोऽतिशेतेऽद्य च कीलकोऽयम्
यत्सप्तशत्युत्सववैभवोत्कः ॥ [१०६]

श्रीमद्वेदान्तसूरिः कविकथकघटाकेसरी वेङ्कटेशः
सर्वेस्सर्वत्र पूज्यो निखिलशुभगुणस्सर्वतन्त्र स्वतन्त्रः ।
आत्मीयं च प्रभावं सकलबुधमुदेऽचीकरत् सुप्रसन्नः
श्रीमद्वेदान्तरामानुजगुरुकरुणाशालिगोपालवाचा ॥ [१०७]

कौण्डिन्यवंशतिलकस्य नृसिंहसूरेः
नप्ता बुधप्रवररङ्गधुरीणपौत्रः ।
श्रीकृष्णसूरितनयो विदुषां विधेयः
गोपालसूरिरनुवत् गुरुराट्प्रभावम् ॥ [१०८]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्री रामानुजपञ्चाशत्

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः ।
वेदान्तलक्ष्मणमुनिः सन्निधत्तां सदा हृदि॥

श्रीमान् रामानुजाचार्यो विशिष्टाद्वैतदेशिकः ।
वेदान्ता येन सन्त्राताास्सन्निधत्तां सदा हृदि ॥ [१]

हारीतकेशवसुधीहृदयाजमित्रं
लोकैकमित्रमवधारितसर्वशास्त्रम् ।
सद्वंश्यसच्चरितकान्तिमतीतनूजं
रामानुजं गुरुवरं शरणं प्रपद्ये ॥ [२]

पिङ्गळाब्दचैत्रशुक्लपञ्चमीयुगार्द्रभे
वासरे गुरोश्शुभे हि हारितान्वयेन्दुना ।
विप्रवर्यकेशवाभिधेन सोमयाजिना
माद्रिपूर्णसोदरीभुवि प्रसूतमाश्रये ॥ [३]

शेषावतार इति माधवपञ्चहेति
रूपावतार इति सैन्यपतेश्च रूपम् ।
इत्यादरात् यदवतारविदो जगुस्तं
रामानुजं यतिपतिं शरणं प्रपद्ये ॥ [४]

पद्मासनस्थिति मभीतिकरं श्रितानां
  तत्त्वं परं समुपदेष्टु मुपात्तमुद्रम् ।
काषायमण्डिततनुं करधृत्त्रिदण्डं
  रामानुजं मुनिवरं शरणं प्रपद्ये ॥ [५]

मदन्तस्सन्तापं शमयतु गुरुर्यस्य च गिरः
  त्रयीचूडानिष्यन्मधुररसपीयूष भरिताः ।
अलङ्कुर्वन् लक्ष्मीरमणहृदया मोदनकराः
  प्रपद्ये तं रामानुजयतिमणिं वैष्णवनिधिम् ॥ [६]

मनीषा यदीया श्रुतीनां विभूषाः
  विशेषाय काषायवेषो यदीयः ।
विधूतास्समस्तेषणा येन नित्यं
  श्रयेऽहं दयाळु मुनिं लक्ष्मणं तम् ॥ [७]

पञ्चशाखभासुरत्रिदण्ड उल्लसच्छिखः
 ब्रह्मसूत्रभूषितः कषायरक्तवस्त्रधृत् ।
वैष्णवं पदं सुखेन लम्भयन् जनान् स्वयम्
  विष्टपे य एधते भजामि तं मुनीश्वरम् ॥ [८]

वेदान्तसारमतुलं निगमान्तदीपं
  निर्दोष मद्भुत मनुत्तमभावभूषम् ।
श्रीभाष्य मन्यनुतनित्यमतीव हृद्यं
  वैकुण्ठरङ्गशरणागति पूर्वगद्यम् ॥ [९]

वेदार्थसङ्ग्रहमथो भगवन्मुखोत्थ-
  गीतार्थवर्णनपरं परमं च भाष्यम् ।
चक्रे कृतीर्नव हि ता इति यस्तमाहुः
  रामानुजं गुरुवरं शरणं प्रपद्ये ॥ [१०]

कप्यास मित्यकृतकोक्तिशिरोविराजि-
  वाक्यस्य यादवगुरूक्त मनर्थमर्थम् ।
कापेयपृष्टसदृशे नयने विभोरि-
  त्याकर्ण्य यश्शुचमगात्तमहं प्रपद्ये ॥ [११]

कप्यासवाक्यसहजार्थविबोधनाय
  विद्योतमानरसपुष्टिमुदात्तभावम् ।
व्याख्याय तं बुधमनोहरमर्थमाशु
  योऽभूत् गुरोरपि गुरुस्तमहं प्रपद्ये ॥ [१२]

कमिति सलिल मेतत् यःपिवत्यर्यमा सः
  कपिरिति कथितस्तेनास्यते यत् तदब्जम् ।
विकसितकमलाभे पद्मनाभस्य नेत्रे
  भवत इति य ऊचे तं यतीन्द्रं प्रपद्ये ॥ [१३]

कं प्यासं यस्य तच्चेत्यकथि कमलमित्यर्थमादाय तद्वत्
  स्यातां नेत्रे यदीये स भवति कमलाक्षान्न चान्यो मुकुन्दात् ।
एवं रम्यार्थवत्त्वे प्यनुचितकथनैर्येन यो निर्जितस्तं
  योगीशानं प्रपद्ये भगवदुरुकृपापात्ररामानुजार्यम् ॥ [१४]

काञ्चीमण्डलवल्लभस्य दुहिता संपीडिता रक्षसा
ब्राह्मेनेत्यवगत्य यादवगुरू राज्ञा समाकारितः ।
गत्वा तेन विलोकिते गुरुरयं नालं मदुत्सारणा-
येत्याक्रुश्य तिरश्चकार विबुध त्वं याहि शिष्यस्तु ते ॥ [१५]

शक्तो मां प्रतिरोद्धमद्य बुधराट् यो ब्राह्मणस्तत्वतः
त्वं पूर्वं वृषशैलमार्गगजनोच्छिष्टान्नभुक्तेर्ननु ।
गोधारूपमपास्य विप्रजनुषं प्राप्तोऽसि विद्वानिहे-
त्युक्त्वा मूर्ध्नि यदीयपादकमलन्यासाद्धि धन्या कृता ॥ [१६]

यत्पादाम्बुजधारणाच्छिरसि सा राज्ञस्सुता रक्षसः
निर्मुक्ता सुखमेधते स्म महिमा रामानुजार्यस्य च ।
काञ्चीभूषणहस्तिशैलविलसद्देवाधिराजालये
यः कालं श्रितशिष्यबोधनविधौ निन्ये गुरुं तं भजे ॥ [१७]

यस्साक्षात्कृतकृष्णदर्शितमहानिक्षेपविद्यां हितां
संवादाकृतिमात्तगद्यवपुषं सर्वोपभोग्यां मुदा ।
कृत्वोज्जीवनमात्मनां च विदधे निर्मत्सरो निर्ममः
तं योगीशमुदात्तभावमनघं भक्त्या भजे लक्ष्मणम् ॥ [१८]

अपसरति भयं यन्नामसङ्कीर्तनाद्यैः
विलसति परतत्वं यद्वचोभिश्च गूढम् ।
विमततिमिरभानुर्वेदचूडासुधांशुः
विहरतु स यतीन्द्रो मानसाने मदीये ॥ [१९]

सिद्धान्तार्थप्रवचनपथं याति रामानुजार्ये
  ह्याम्नायानां क्वचिदपि न तु स्वार्थहानेः प्रसक्तिः ।
प्रत्यक्षादिः प्रभवति निजार्थेषु निर्वैरिचारी
  स्मारं स्मारं तदुदितगिरस्संश्रये तत्पदाब्जे ॥ [२०]

काणादैर्भुवि वादिभिर्दुरुदयैश्शाक्यैश्च पाषण्डिभिः
  निश्शेषं च विलोपितश्श्रुतिगतो धर्मोऽभवत् सर्वतः ।
तादृग्धर्ममरं त्रिदण्डमहितो योगीन्द्ररूपी हरिः
  यस्संरक्षितवानयं स इति यां कीर्तिं दधौ तं भजे ॥ [२१]

श्रीरङ्गवासरसिको मुनियामुनार्यः
  श्रुत्वा यदीयभगवद्गतभक्तिमुख्यान् ।
श्रेष्ठान् गुणान् किमपि कर्तुमियेष यस्मिन्
  तं सद्गुणार्णव मुदारधियं प्रपद्ये ॥ [२२]

अयं महात्मा यदि दर्शनेऽस्मिन्
  प्रवेशित स्स्यात् प्रथितो भविष्यति ।
इत्यूचिवान् यं प्रति यामुनार्यः
  रामानुजं तं शरणं व्रजामि ॥ [२३]

शास्त्रान्तराध्ययनकालसमाप्तिमेव
  श्रीयामुने गुरुवरस्य निरीक्षमाणे ।
विज्ञाय सन्निहित मात्मविमुक्तिकालं
  ह्यानाययत् यमनिशं तमहं प्रपद्ये ॥ [२४]

संप्राप्ते चरमां दशां मुनिवरे श्रीयामुनार्ये तदा
तस्याकुञ्चितमङ्गुलित्रयमथो निर्वर्ण्य तत्कारणम् ।
ज्ञात्वा योगिकृपावशात्तदखिलं कुर्वेऽहमित्याश्रुते
येनैवार्जवमाप तत् सपदि तं रामानुजं संश्रये ॥ [२५]

नीत्वा मूकं कदाचित् कमपि निजगृहं बन्धयित्वाऽररं च
स्वीयाङ्घ्रिस्पर्शसंज्ञां दिशति यतिपतौ सोऽपि चक्रे तथैव ।
दृष्ट्वेदं कूरनाथोऽप्यमनुत न कुतोऽवागभूवं किमर्थं
शास्त्राभ्यासोऽन्यथा स्यात् मयि गुरुकरुणेत्याश्रये तं मुनीन्द्रम् ॥ [२६]

सालग्रामनिवासिन स्स्वविषये प्रच्छन्नविद्वेषिणः
सन्त्यत्रादरतो न चेति विदितश्शिष्याय योगी तदा ।
तीर्थे न्यस्य पदौ सदोपविशतादित्याह सोऽप्याचरत्
तत्पादाम्बुनिषेवणात् सुचरिता यं चाश्रितास्तं भजे ॥ [२७]

भूपो विठ्ठलदेव आत्मतनया दुष्टग्रहोत्पीडिता
निर्वासाश्चरतीति खिन्नहृदयश्श्रुत्वा प्रभावं गुरोः ।
यस्यानुग्रहतो गतग्रहमतिभ्रान्तिं विलोक्यात्मजां
तुष्टाव स्वयमप्यवाप शरणं तं संयमीन्द्रं भजे ॥ [२८]

भूमिपाय विष्णुवर्धनेति नाम्नि धारिते
गर्विता जिनानुगा ययुर्गुरुं तदोचिरे ।
भो विजित्य नो न किं स्वकीयमेतमीप्ससी-
त्याशु तान् स्वसेविनो व्यधात्तमाश्रये मुनिम् ॥ [२९]

बहुगुणबहुधान्ये भानुखेळाशकाब्दे
मकरसितचतुर्दश्यह्नि तारेऽदितेश्च ।
यदुगिरिशुभदीपो दर्शनेच्छानुरूपः
नयनगत उपासे यस्य नारायण त्वम् ॥ [३०]

श्रीपाञ्चरात्रगतसात्वतसंहितोक्त-
संप्रोक्षणं शुभकरं कमलेक्षणाय ।
श्रीरङ्गराजकरनीरजतः प्रहृष्टः
योऽकारयत्तमनिशं शरणं प्रपद्ये ॥ [३१]

योऽभवत्तदोत्सवार्थबेरशोकभाक्ततः
स्वप्नलब्धतत्प्रवृत्युपार्जितात्मविग्रहः ।
नित्यपक्षमासवत्सरोत्सवोत्सुकाग्रणीः
तानकारयुन्मुदा सदा तमाश्रये गुरुम् ॥ [३२]

डिल्लीनाथ तवादरेण मुदितो जानीहि मामर्थिनं
यल्लीलार्थमुपागतोऽत्र रमते रामप्रियो मत्प्रियः ।
अत्रत्येषु विचिन्वतां कतम इत्यावेदिते पश्यतः
यस्याङ्के स्वयमागत स्समलसत्तं देवमाभावये ॥ [३३]

पुलकितनिखिलाङ्ग स्तोषितात्मान्तरङ्गः
यतिपतिरवदत् त्वं संपदां मे कुमारः ।
क्षितिपतिरपि दृष्ट्वा तत् प्रहृष्टः प्रपेदे
शरण मनुपदं तं यामि रामानुजार्यम् ॥ [३४]

रामप्रियोऽसौ यतिराजपुत्रः
सम्पत्कुमारः पुरुषोत्तमोऽभूत् ।
यद्योगतो भाग्यमियाय शैलः
प्रख्यात इत्याहुरहं तमीडे ॥ [३५]

आनीयास्यापि सत्यादिह सनकमुखेनेति नारायणाद्रिः
दत्तात्रेयेण वेदा इह परिपठिता इत्यसौ वेदशैलः ।
रामः कृष्णोऽर्चितोऽत्रेत्यतिशयितयशा यादवाद्रि स्तृतीये
भूयस्तुर्ये युगेऽस्मिन् यतिपतिपुनरुज्जीवनाद्योगिशैलः ॥ [३६]

नारायणो यन्महिमानमादरात्
प्रकाशयत्युत्सवबेर माप्य ।
सम्पत्कुमारो यतिराजपुत्रा-
भिख्यां यतोऽगाच्च भजे गुरुं तम् ॥ [३७]

श्री रामानुज मत्प्रियस्त्वमिह ते त्वत्पादसेवाजुषां
त्वत्सिद्धान्तजुषां च नान्यसुलभां सौभाग्यदां सर्वदा ।
आत्मीयोभयभूतिसंपदमदामित्याह यस्मै मुदा
श्रीरङ्गाधिपतिस्तमन्वहमहं श्रेयोवहं संश्रये ॥ [३८]

प्रयास्यत्यात्मीयैस्सह यतिपतौ वेङ्कटगिरि
पयस्याजीवैका सुकृतपरिपाकादुपगता ।
दधिद्रव्यार्था यत्पदसलिलपानान्मतिमती
प्रपेदे मोक्षार्थं तमहमनिशं यामि शरणम् ॥ [३९]

प्रदक्षिणत एव तं सकृदुपेहि रामानुजं
  त्रिदण्डकरमण्डितो भवति योगिसेव्यो भवान् ।
इति द्विपगिरीश्वरे वदति यादव स्स्वप्नतः
  प्रपद्य शुशुभे स यं मुनिवरं भजे तं सदा ॥ [४०]

वादोऽतिमोदाद्ववृधे यतीन्द्रोः
  दयाळुनाम्ना विदुषा तदा यः ।
निरुत्तरोप्युक्तसदुत्तरश्च
  जिगाय देवप्रियमाश्रये तम् ॥ [४१]

संस्तूयतां किमपि चेति किडांबियाच्चान्
  आज्ञप्त एकमपठत् स्तुतिरत्नपद्यम् ।
रामानुजे सति भवानगतिः कथं स्यात्
  इत्याह यद्विभवमीश मुपाश्रयेऽहम् ॥ [४२]

असङ्ख्याता जीवाः कथमपि न मां यान्ति पतिताः
  कथं वा धत्से तान् विशदय वशीकारसरणिम् ।
इतीशादापृष्टो गतभय उपायोक्ति मनघां
  न्यवेदीत् यस्तादृक्सरसवचनं तं गुरुमये ॥ [४३]

श्रीमान् श्रीशठकोपसूरिरपि यं योगीश्वरं भाविनं
  निर्दिश्यैव जगौ जगत्यविकला श्रीर्वैष्णवी वर्धताम् ।
इत्येवं स्ववचोभरै श्शमधनं तादृग्यशोभासुरं
  साटोपः कलिरप्यपाकृत यतो रामानुजं तं भजे ॥ [४४]

कासारारोहणस्थं पिबति च चटको वीरनारायणीये
वाराशौ तत् स्थितं चेज्जनपदममृतं पाययेदन्वहं हि।
इत्थं श्रीनाथयोगी यदमितमहिमोत्कर्ष माविश्चकार
प्राज्ञं रामानुजार्य जनिभयहरणं तं शरण्यं प्रपद्ये ॥ [४५]

गोष्ठीपूर्णोपदिष्टं मनुमनुनिलयं प्राप्य नारायणीयं
गोष्ठ्यामष्टाक्षरं तं श्रुतिशतमधुरं सर्ववेदार्थसारम् ।
उच्चैरुच्चारयन् यो निजदुरितफलं त्वेकभोग्यं हि तत्स्यात्
मोक्षोऽनेकात्मभोग्यो गुरुवरकृपयेत्याह तं संश्रयेऽहम् ॥ [४६]

सूक्तेरर्थस्सनिन्दश्शठजिदभिमतो यामुनार्यादृतश्चे-
त्युक्ते मालाधरार्यैर्भगवति भवदुक्तोऽयमर्थो न युक्तः ।
देवस्यैवोपकारस्मृतिपर उचितो हीति सन्दर्भयोग्यं
व्याख्यास्यन् पूर्णमान्योऽभवदतिकुशलस्तं यतीन्द्रं नमामि ॥ [४७]

पूर्वाचार्यदयैकवेद्यविषयप्रस्तावनायां क्वचित्
श्रीमद्यामुनयोगिनां न हि भवेत् प्रायोऽयमत्राशयः।
एवं वादिन माह यामुनमुनिं क्वेत्यैक्षथाः स्रग्धरः
स्यादेवं ननु तस्य सद्गुरुमणे रस्म्येकलव्यः प्रियः ॥ [४८]

भक्तिप्रस्यन्दिनीं तां गिरमभिदधतो वीक्ष्य तेजोविशेषं
शेषं काषायवेषं पुरुषमकलुषं मन्यमानोऽवतारम् ।
विष्णोर्नत्वा यमन्तर्बहुविधमनुवत् स्वात्मजं कान्तबाहुं
शिष्यं चाकारयत् यत्पदनळिनयुगे तं भजे संयमीन्द्रम् ॥ [४९]

श्रीरङ्गेन्दोरिश्रयं तामविकलमहितां योगिभोगी वितेने
शेषाशेषात्मदोषप्रमुषमगजुषं भूषिताशेषदोषम् ।
हस्तीशेक्षाविशेषादलभत यतिराड्वेष मात्तप्रभावं
बेरं माहं ददौ यो यदुगिरिकमितुर्नौमि रामानुजं तम् ॥ [५०]

एतां पञ्चाशतं ये यतिपतिविषयां श्रद्धया संपठन्ति
सद्वृत्तां सद्गुणाढ्याम् मुनिवरकरुणापात्रगोपालगीताम्।
तेभ्यो रामानुजार्यो वितरति सुमतिं भक्तिमात्मेप्सितार्थं
शुद्धं ज्ञानं स्थिरं सद्यश इह परतश्चात्मविद्याप्रभावम् ॥ [५१]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्रीनिवासाष्टोत्तरशतनामस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासो वासुदेवो लक्ष्मीशः पुरुषोत्तमः ।
अचिन्त्यानन्तविभवो भावाभावविभावनः ॥ [१]

अहंभावात्मभावात्मा शान्तानन्तविभूतिकः ।
परंब्रह्म व्यक्तभासः लीलालोलजगन्मयः ॥ [२]

सर्वाधारः कामदोग्धा सर्वशक्तो विमुक्तिदः ।
आद्यन्तरहितो देवः सर्वकार्यैककारणः ॥ [३]

सर्वाङ्गसुन्दरः सर्वव्यापको भवतारकः ।
हिरण्यवर्णो हैरण्यप्राकारो वेदगोचरः ॥ [४]

मनोज्ञेयो ज्ञानगम्यो नित्यमुक्तात्मसेवितः ।
निर्विकल्पो महानन्दः महामायो महौषधिः ॥ [५]

शुभावहो नित्यतुष्टः परमात्मा जगन्निधिः ।
विद्याप्रियः सुप्रसन्नः सर्वगन्धो मनोहरः ॥ [६]

सामप्रियः सर्वसेव्यः शुभरेखः चतुर्भुजः ।
भक्तजुष्टो नित्यपुष्टः निरुपाधिः महाबलः ॥ [७]

अक्षोभ्यः सर्वतोभद्रः निर्भयः समदर्शनः ।
स्तुतिप्रियः त्रिकालस्थः सर्वाकारो महोदयः ॥ [८]

भोगप्रियो दयाम्भोधिः शान्तिदो भक्तवत्सलः ।
नारायणो दीर्घवन्धुः वक्षोलक्ष्मीविलासवान् ॥ [९]

सर्वदोषप्रशमनः सर्वाभीष्टप्रदायकः ।
सर्वपापप्रशमनः सर्वसौभाग्यदायकः ॥ [१०]

योगप्रियः योगिसेव्यः शरण्यो योगसिद्धिदः ।
पुण्यावासः सत्यरतः हृदयस्थफलप्रदः ॥ [११]

देवश्रीशः वेदमेशः महाश्रीशो द्विजप्रियः ।
ब्रह्मश्रीशः पुण्यरूपः योगीशः सात्विकप्रियः ॥ [१२]

सीताकान्तः शमोपघ्नः रुक्माभः प्रियदर्शनः ।
क्षेमदः सत्यभामेशः धरेशो यज्ञदक्षिणः ॥ [१३]

विष्णुक्रान्तो रथक्रान्तः वाराहः सर्वसाक्षिकः ।
सुदर्शनो यज्ञगर्भः साधुत्रो रत्नपादुकः ॥ [१४]

दुस्स्वप्नदुष्फलहरः शुभाङ्गो वसुधाप्रियः ।
श्रेयस्करो देवदेवः सुवीरो दुष्टमर्दनः ॥ [१५]

भास्करो ज्ञानचक्रेशः स्वस्तिदः श्रेयसां निधिः ।
पद्मवतीसहचरः भोगीन्द्रशयनप्रियः ॥ [१६]

शान्तिप्रियो महाविष्णुः ज्ञानदः स्फूर्तिदायकः ।
सर्वलक्षणलक्षण्यः सर्वलोकप्रियङ्करः ॥ [१७]

सर्वलोकैकशरणः सर्वलोकेष्टदायकः ।
एवं स्वाभीष्टदैः श्लोकैः स्तुतः श्रीशो ददाति शम् ॥ [१८]

नमोऽस्त्वाचार्यपादाभ्यां महालक्ष्म्यै नमो नमः ।
प्रणमामि प्रणौमि त्वां महाविष्णो प्रसीद मे ॥ [१९]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्रीनिवासप्रपदनस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवेरकन्यासुतटेऽतिरम्ये श्रीवेणुगोपालसहाधिवासम् ।
भक्तानुकम्पार्थकृतावतारं श्रीश्रीनिवासं शरणं प्रपद्ये ॥ [१]

क्षेत्रे पवित्रे कृतशालिगोत्रे मुदा वसन्तं सकलेष्टदं हरिम् ।
अपारसंसारसमुद्रसेतुं रमानिवासं शरणं प्रपद्ये ॥ [२]

कावेरिकाकूलसुशालिशालि श्रीसोसलेनाम्नि पुरे वसन्तं ।
ददानमासेचनकं सुदर्शनं लक्ष्मीनिवासं शरणं वृणोऽहम् ॥ [३]

महीसुराराधितपादपद्म पद्मानिवासं करुणालुमार्तिहं ।
अस्मद्गुरूदारपरंपराभिः संसेवितं तं शरणं व्रजामि ॥ [४]

नमस्ते नमस्ते कटिन्यस्तपाणे सदादर्शितात्मीयपादैकपाणे ।
स्थिरां देहि भक्तिं भवत्पादपद्मे प्रदेहि श्रियं निश्चलां श्रीनिवास ॥ [५]

पञ्चपद्यां स्तुतिं भक्तिपद्यामाश्रित्य यः पठेत् ।
गोपालगीतां सततं लभेतात्मेप्सितं फलम् ॥ [६]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्री वेङ्कटेशस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः ।
वेदान्तलक्ष्मणस्सोऽयं विभातु हृदिमे गुरुः॥

श्रीमान् वेदान्तसूरिः करकमलयुगे ज्ञानमुद्रां च कोशं
विभ्राणोब्जासनस्थो वनरुहतुलसीदामवान् वादिसिंहः ।
ब्रह्मज्ञस्सर्वतन्त्रेष्वतिकुशलमतिः कीर्तिमूर्तिर्महात्मा
श्रेयोदर्शी जननां कविकुलतिलकः सन्निधत्तां सदा नः ॥ [१]

मान्यादात्रेयगोत्रादखिलगुणनिधेर्मातुलात् देशिकेन्द्रात्
श्रीमद्रामानुजार्यात् अधिगतसकलात्मीयशस्त्रार्थसारः ।
प्रत्नाचार्योपदिष्टान्यनितरसुलभान्युक्तिरत्नानि योऽदात्
लोकायामोदतस्तं शुभगुणजलधिं वेदचूडार्यमीडे ॥ [२]

वेङ्कं वेदान्तसूरेः पदकमलयुगं सर्वदा भावयेऽहं
प्राज्ञानां शुद्धबुद्धिप्रदमुरुसुखदं मोक्षदोपायनिष्ठम् ।
यत्प्राप्त्यर्थं जुहावाश्रितजनशरणोऽनन्तसूरिञ्च सुप्तौ
विश्वामित्रान्ववायं वृषगिरिदयितः स्वीयघण्टां प्रदित्सुः ॥ [३]

कञ्जस्य द्विपदस्य पर्णतुलनां याताङ्गुलीनां ततिः
श्रीमद्वेदशिरोगुरोरविरतं मन्मानसे प्रोल्लसेत् ।
यं प्राप्तुं वृषशैलनायकहरेः घण्टामयं प्रापिता
माता द्वादशवत्सरैरबिभरत् तोता स्वगर्भ शुभैः ॥ [४]

टङ्कं यद्दुरितोपलोद्भिदलने वेदान्तसूरेः पद्
द्वन्द्वं भावयतां अलङ्कृतरथच्छत्रादि विभ्राजते ।
यः काञ्च्यां विभवे नभस्य उदितः विष्णोश्शुभे भे महे
तीर्थाहे वृषशैलशेखरपतेः वर्ति कीर्त्युज्वलः ॥ [५]

नाथे श्रीकविवादिपञ्चवदनाचार्यस्य जङ्घायुगं
संसारानुगतेर्निवर्त्य तरसा गत्यै च निश्रेयसः ।
यो रामानुजसूदसूनुजसुतासूनुर्भवत्यद्भुतः
श्रीरामानुजवादिहंसगुरुरस्यान्तेनिवास्यार्तिहा ॥ [६]

थाभासं तदुरोजविभ्रमनिभं जान्वोर्युगं संस्मरा-
म्यात्मज्ञानददर्पणं पदजुषां श्रुत्यन्तचूडागुरोः ।
प्राचार्यस्य मुदावहो वरदगुर्वाख्यस्य यः शैशवे
तस्यानुग्रहतः प्रभावितमतिस्साशीर्वचः प्रेक्षितः ॥ [७]

आर्यो देशिकवर्य एष नियतश्चारूरुयुग्मं स्तुवम्
न्यास श्रीकृतमङ्गलाभिषवण स्तन्नागशुण्डोपमम् ।
पित्रा यस्समुपात्तकर्मनिचय स्तेनोपनीत स्तथा
साङ्गाध्याय उपाजहार सुदतीं लेभे गुरुं तं स्तुवे ॥ [८]

कल्याणं दिशतात् कटीतटवरः दिव्यस्त्रयीशेखरा-
चार्यस्यामलकोमलाद्रिरुचिरः श्रीवासनामोदितः ।
वेदान्तद्वयमात्ममातुलकृपाभूम्ना रहस्यान्यपि
प्राप्याभ्राजत सर्वशास्त्रनिपुणो यस्तं श्रये देशिकम् ॥ [९]

विश्वासातिशयं दिशेदविरतं श्रीवेदचूडागुरोः
कट्या चोर्ध्वधृतस्सुधांशुधवलो भात्युत्तरीयस्सदा ।
काञ्च्यां यो वरदं रमासहचरं संसेवमानो नुतीः
सर्वाभीष्टफलप्रदास्सुपठतां वह्नीर्वितन्वन् बभौ ॥ [१०]

तारार्थं निगमान्तदेशिकमणेः नाभिर्महाब्धेर्महा-
वर्तोत्कर्षवती स्फुटं प्रकटयत्वात्मावबोधं हितम्।
पारावार परीवृतेऽतिमहिते तारार्थधाराधरः
योऽवर्षत् स्वकृते रहस्यनिचये लोकाभिरक्षोन्मुनाः ॥ [११]

किंवा वर्णयितुं क्षमा वयमिमे यो निर्मये सत्कृतीः
तद्देयादुदरं वलित्रयधरं श्रीवेदचूडागुरोः ।
भक्तेष्टप्रदमाप्तसिन्धरमुखं वन्धुं बुधानां सदा
श्लोकैस्संस्तुतवान् अवाप सकलास्सिद्धीश्च सर्वेष्टदाः ॥ [१२]

कर्तव्यं सकृदेव तत्प्रपदनं सर्वार्थदं श्रीपते
शास्त्रोदीरितवत्मनेत्यसदृशैः ग्रन्थैर्व्यवास्थापयत् ।
यो वा वेङ्कटनाथदेशिकमणिः विद्विद्भि राशंसितः
श्रीशैलेशदयाशतीं विरचयन्हृष्टस्त माभावये ॥ [१३]

केनान्येन विवादतो मलिनतां प्राप्ता प्रपत्तिः परा
  निर्दुष्टा सकलेष्टदा श्रुतिशिरस्सूरिं विना रक्षिता ।
येनाद्यावधि सुप्रतिष्ठितमिता निष्कण्टका भ्राजते
  सोऽयं श्रीनिगमान्तदेशिकमणिः भूयात् सतां श्रेयसे ॥ [१४]

सन्मार्ग नयतात् तनोतु सदयं वेदान्तसूरेरुरः
  स्वान्तं मे विमलीकरोतु च सदा सद्भावनापूरितम् ।
सारासारविवेचकं कलयतात् श्रीरङ्गराजोषितं
  तत्तादृङ्घनसं परात्पररसं सञ्चिन्तयाम्यन्वहम् ॥ [१५]

रीतिस्सर्वा यदीया सकलजनमनोहारिणी शर्मदात्री
  बाह्वोर्मूले विभातां श्रुतिशिखरगुरोरङ्किते शङ्खचक्रे ।
चक्रे श्रीरङ्गनेतुश्चरणकमलयोर्मङ्गळाशासनं यः
  वाद्युन्मत्तान् जिगाय प्रमुदितहृदयस्संस्तुवे तं सदाहम् ॥ [१६]

वेदान्ताचार्यवर्यो दिशतु सुविशदं सर्ववेदान्ततत्वं
  व्याख्यामुद्राकरो य श्शुभगुणनिलयस्सत्यवाक् शुद्धकर्मा ।
प्रज्ञाकल्पद्रुमस्सन् सकलसुमनसां सर्वकामान् प्रदेयात्
  धन्या यत्सप्तशत्यामहमतिविभवं कीलकेऽपीक्षितारः ॥ [१७]

दान्तो वेदान्तसूरिर्विषमभवकृतात् वन्धनान्मोचयेन्नः
  प्रज्ञाकूपारपारङ्गत उरुकरुणः पुस्तकोद्भासिहस्तः ।
यः प्रागस्तोकबुद्धिं व्यजयत विबुधं कृष्णमिश्र प्रभावान्
  स्वीयात् सङ्कल्पसूर्योदयत इह मुदा प्राप तं संश्रयेऽहम् ॥ [१८]

तान्तानस्मान् नितान्तं करणपरवशान् सान्त्वयेदात्मवाग्भिः
यत्तातोऽनन्तसूरिस्स्वयमपि सकलाम्नायचूडार्यसूरिः ।
कण्ठस्तस्योपकण्ठानतजननिवहान् शङ्खसङ्काशकाशः
श्रीभाष्यं कण्ठपाठं व्यतनुत सुलभं तं च सम्भावयामि ॥ [१९]

चार्वाकान् चारुगीर्भिः श्रुतिपथविमुखान् लोकसम्मोहकांस्तान्
अद्धा दूरीचकार श्रुतिशिखरगुरुर्नीतिमूर्तित्रयीभिः ।
सच्चारित्रं यदीयं तदवतु महतो दुष्कृतान्मां पुनातु
वैदुष्यं चातनोतु प्रियहयवदनाम्भोजपीयूषपायी ॥ [२०]

यस्मिन् रामानुजार्यः परमकरुणया स्वीयसिद्धान्तरक्षा-
भारं श्रीकूरनाथप्रभृतिगुरुवरद्वारतोऽस्थापयत् सः ।
वेदान्तार्याभिधानः कलितबहुयशाः लक्ष्मणांशं दधानः
कुर्यात् वैराग्यमूर्तिस्त्वधिकशतकृतीः सर्वजिह्वाविधेयाः ॥ [२१]

वर्धिष्णुर्विष्णुनाम्नां जपत इह जनो याति सर्वार्थसिद्धिं
वेदान्ताचार्यनाम्नां मननत उभयाम्नायवेत्ता चकास्ति ।
तत्पादाब्जप्रणामादनितरसुलभां स्तान्पुमर्थानुपैति
तद्ग्रन्थालोकनेन प्रविजितविमतस्सम्प्रबुद्धौ विभाति ॥ [२२]

यस्साक्षाद्वेङ्कटेशो जगदुपकृतये स्वेन नाम्नाविरासीत्
तद्घण्टांशोऽथवेति प्रथित इह गुरुर्यस्य पुत्रोऽपि तद्वत्।
श्रीमद्देवाधिराजो वरद इति समाभिख्ययासीत् प्रसिद्धः
तं विद्वद्बृन्दवन्द्यं सुतवरसहितं वेदचूडार्य मीडे ॥ [२३]

मेनेऽमेयप्रभावं प्रतिभटरहितं सर्वतन्त्रस्वतन्त्रं
कुर्वाणं वीक्ष्य यामे त्वनितरसुकरं रङ्गपादूसहस्रम्।
यं च श्रीरङ्गराजः कविकथकघटाकेसरीत्याजुहाव
श्रेयस्सूतिं सतां तं रचितबहुकृतिं संस्तुवे देशिकेन्द्रम् ॥ [२४]

संक्षिप्ता विस्तृता वा कृतिततिरतुला तत्तदिच्छानुरूपा
वेदान्तार्यप्रणीता सकलजनमनोहारिणी धारणीया ।
सङ्ख्यातीतापि तत्र प्रभवति विदिता मुक्तये काचिदेका
तत्तादृक्तारतम्यं कृतिषु न तु फले यस्य तं संस्तवीमि ॥ [२५]

नित्यं तत्कर्णयुग्मं श्रुतिमधुरमनुं श्रीमुखोद्भासि वर्णं
मद्गीतं श्लोकरूपं निशमयतु गुरुस्सर्वदं सर्वदाता ।
वेदान्तार्यस्सुवर्णं निजतनयकृतं हर्षतो गानलोलान्
सम्प्रेक्ष्याध्यात्मचिन्ताफलभुगभिमुखान् संविधत्तां श्रितान्नः ॥ [२६]

धत्ते श्रीवैष्णवीयां श्रियमळिकतलं सूर्ध्वपुण्ड्रोज्ज्वलं
यत् वेदान्तार्यस्य तत्तद्गगुरुवरकृपया सर्व एवोपयन्तु ।
व्याख्या सौदर्शनीया यतिपतिरचितश्रीतभाष्यस्य याप्ता
यश्च प्राचीकटत्तां अतिविमलमतिष्वद्य यावत् स्तुवे तम् ॥ [२७]

तामेवाहं समीडे कविकथकहरेर्नीलचूडां सुकेशैः
युक्ता मस्याब्जमाध्वीव्रतिभिरिव हरेर्मूर्तीमद्भिः कटाक्षैः ।
एवं चापादचूडं गुरुवरसुषुमा संश्रितानां सुशोभां
सर्वक्षेमाय नित्यं प्रदिशतु च महाचार्यभूमा महात्मा ॥ [२८]

सत्यं शान्तिर्विरक्तिर्विजितकरणता साधुता पारतन्त्र्यं
नैस्पृह्यं धीरता श्रीपतिपदकमलासक्ति रक्षोभ्यता च ।
कारुण्यं निर्भरत्वं शुचिमृदुपटुता नम्रता मान्यतेति
यस्मिन्नाजानशुद्धाश्शुभगुणनिवहास्तं श्रये देशिकेन्द्रम् ॥ [२९]

दाता वेदान्तसूरिः श्रुतिशतसुधियः संश्रितानां दयालुः
नानासिद्धान्तवेत्ता प्रणतमतिमतां सद्रहस्योपदेष्टा ।
विश्वात्मोज्जीवनैकप्रपदनकलया दर्शितात्मप्रकर्षः
सङ्ख्यातीतप्रबन्धप्रणयननिपुणः पातु नस्तन्मनस्कान् ॥ [३०]

हृद्यां स्वाद्यां रसज्ञा स्तुतिममु मधुना यत् त्वदीयां बुधानां
मोदात् वेदान्तसूरे विभवकृतजने कीलकेऽन्यासमाने ।
आनन्दोद्धर्षवर्षे रसयति तदिदं त्वत्कटाक्षेक्षितानां
अस्माकं भागधेयं सुफलितमभवत् सप्तशत्युत्सवाहे ॥ [३१]

दिव्या व्याख्यानरीतिर्विविधकृतिततेर्यत्कृता सुप्रसिद्धा
लक्ष्म्यास्तत्वप्रतिष्ठा प्रपदनमहिमोत्कर्षताऽऽविष्कृता च ।
यद्विक्षिप्ता विपक्षा यतिपतिमतसंरक्षणेऽत्यन्तदक्षः
सोऽयं वेदान्तसूरिर्विलसतु जगतां रक्षणे बद्धदीक्षः ॥ [३२]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# श्री यामुनमुनिस्तुतिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

यदुपज्ञ मशेषवैष्णवश्श्रीः
प्रथिता योगरहस्यविच्च येन ।
शठकोपमुनिर्विलोकित स्तं
विबुधं नाथमुनिं नमामि नित्यम् ॥ [१]

श्रीमन्नाथमुनेर्बुधोत्तममणेर्योगीश्वरस्यात्मजः
श्रीमानीश्वरमुन्यभिख्य उदित स्सद्धर्मसंरक्षकः ।
योऽस्मत्संस्तवनाश्रयस्य जनक श्श्रीयामुनार्यस्य तं
प्रख्याताात्मगुणादिसंपदमहं श्रीवैष्णवाग्र्यं भजे ॥ [२]

श्रीमद्रङ्गाधिनेतुर्निरवधिकदयापात्रभूतेश्वराख्यः
प्रादुर्भूतः कुमाराकृति रतिसुकृती विश्वविख्यातकीर्तिः ।
धातावब्दे कुळीरे बुधदिनमहितेतूत्तराषाढतारे
राकायां रङ्गपुर्यां श्रुतिशिखरयुगोल्लासकरी तमीडे ॥ [३]

शुक्लपक्षचन्द्रवत् प्रवर्धमाननदनं
युक्तकालकारितद्विजार्हकर्मशोभिनम् ।
पाठकोक्तिमात्रलब्धकण्ठपाठपाठिनं
यामुनं पितामहोक्तनामधारिणं श्रये ॥ [४]

महाभाष्यभट्टाभिधांनो बुधेन्द्रो
बभौ सर्वशास्त्रप्रवक्ता स यस्य ।
तदानन्यसामान्यशास्त्रोपदेष्टा
स्तुवेऽतः प्रवीणं मुनिं यामुनं तम् ॥ [५]

आस्थान्यां चोळराजः प्रथितबुध उवासाक्कियाळ्वानभिख्यः
गर्वी चोर्वीबुधेभ्यो तुदति कर मुपादाय तान् भर्त्सयन् स्म ।
मेधावी यामुनार्य स्स्वगुरु मपि तथा पीडितं वीक्ष्य रुष्टः
तस्मै दृप्ताय पद्यं नवय मिति कृतं प्रैषयत् तं नमामि ॥ [६]

आकर्ण्यैतां प्रवृत्तिं निजपरिजनतो मान्य आनीयतां द्राक्
सर्वमन्यं मदीयं जयति यदि तदानन्यसाधारण स्स्यात् ।
इत्युक्त्वान्दोलिकाद्यैः यमखिलविरुदै राट् समानाययत् यः
आशैलादि त्यवादीत् रसमय मभयः पद्यं ईडे गुरुं तम् ॥ [७]

पूर्व शास्त्रार्थवादात् प्रचलित उभयोर्लौकिके वाक्प्रयोगे
माता ते नैव वन्ध्या मनुजपतिरयं सार्वभौम स्सतीयम् ।
ईदृक्प्रश्नत्रयस्य प्रतिवच उचितं यस्य नोचे स विद्वान्
यस्मै राज्यार्ध मुर्वीपति रथ च मुदा दत्तासम्भावये तम् ॥ [८]

आयान्तं प्रतिवीक्ष्य चोळमहिषी प्रोचे मुदा यामुनम्
यं कारुण्यपयोधि मात्मगुणिनं पाण्डित्यकल्पद्रुमम्।
किं मां शास्तु मुपागतोऽसि भगवन्नुज्जीवये त्यब्रवीत्
यस्य द्राविडनामतोऽपि चरितं ख्यातं भजे तं गुरुम् ॥ [९]

राजभोगभोगिनं सभार्यमार्ययामुनं
  राममिश्र एकदा गुरोर्निदेशतो मुदा ।
आत्मसाद्विधातु मेत्य नेक्षितुं शशाक यं
  शाकमेकमीप्सितं ददावलर्कनामकं ॥ [१०]

पाचकस्य कस्यचित्करे विपच्य भोजये-
  त्यन्वहं तथाशयन्नपीप्सितं यदाप न ।
जोष मेकवासरं स्थितोऽथ सूद माह यो
  भो अलर्कशाकदं प्रदयिति तं भजे ॥ [११]

नृपविभवविलोलो राममिश्रं विवक्षुम्
  समयविदुपयातं यामुनार्योऽन्वयुङ्क्तः ।
अतिशयमहिमा त्वं काङ्क्षसे किं ददानी-
  त्यथ किमपि न चाहं किं तु दित्सुः प्रभो ते ॥ [१२]

आवन् प्रत्ना मनीषिन् निधिमिव भवतः किञ्चिदर्थं त्वदर्थं
  श्रुत्वैवोपैष्यभिज्ञ स्तदवधि सविधं देहि ते मेऽभिवेत्त्रे ।
एवं विज्ञापितो य स्तदनु बहुविधं तेन गीतार्थसारं
  विज्ञायात्यन्तहृष्टोऽभवदुपगमितोपाय आभावये तम् ॥ [१३]

गीतार्थं सरहस्य माशु बुबुधे श्रीराममिश्राश्रयात्
  साक्षात्कार मनन्यबोधसुलभं मोक्षोपकारं यतः ।
तस्योपाय मवाप यश्च समये वैराग्यभाग्यो बभौ
  श्रीरङ्गेशनिषेवणैकसुमतिर्भूत्वा तं अन्तर्दधे ॥ [१४]

परमात्मन्यनुरक्तं प्राकृतविषये विरक्तं आत्मज्ञम्
परिपक्वचित्तवृत्तिं यामुनयतिचक्रवर्तिनं वन्दे ॥ [१५]

पूर्ण महापूर्ण मुखै स्स्वशिष्यैः  गुणार्णवैर्यं नियुयोज तूर्णम्।
श्रीराममिश्रः कुरुकाधिपालसूरिं  रहस्यार्थमिहीत्यये तम् ॥ [१६]

श्रीराममिश्रगुरु रात्मान्तकाल मभिवीक्ष्यात्मबोधवशिनं
श्रीरङ्ग आस्व बुधमान्यं स्थिरीकुरु च सद्दर्शनप्रवचने ।
एवं समीर्य कमलाक्षं विचिन्त्य गुरु मादिश्य यं स्वयमयात्
तं यामुनार्य मह मीडे सदावसथ माधूतवादिनिकरम् ॥ [१७]

यथा गुरूक्तं कुरुकावलप्पन्
वशे स्थितं योगरहस्य माप्तुम्।
य स्तं समाधिस्थ मुपेत्य भीतो
विघ्नाच्च तूष्णीं स्थित आश्रये तम् ॥ [१८]

श्रीनाथमुन्यन्वयज स्सुधीन्द्रः यः
कोप्युपायात इहास्ति वेति ।
श्रुत्वा गिरं यश्च विसिष्मयेऽथ
ज्ञातं कथं न्वित्यवदत् तमीडे ॥ [१९]

पद्मासेचनकांबुजाक्षिमधुरालोकैर्विकृष्टोप्यहो-
मा मानन्दिन मप्यपास्य कमलाकान्तोऽन्य मन्वैक्षत ।
वंश्यो नाथमुनेर्भवेदिति विदन् येनाथ संप्रार्थितः
भूयो यस्य समागमाय समयं चाऽहाश्रये तं गुरुम् ॥ [२०]

श्रीरङ्गेऽध्ययनोत्सवे शठरिपो स्सूक्तिं सुगीतां वुधैः
श्रुत्वानन्तपयोजनाभचरणाम्भोजैकसेवादरः ।
गत्वाऽनन्तपुरं निजाभिलषितं संपूर्य तत्रोषितः
स्मृत्वा योगरहस्यवेदनदिनं खिन्न स्तमार्यं भजे ॥ [२१]

काञ्चीमण्डलवासिनौ द्विजवरौ श्रीरङ्गमासेदतुः
नत्वा यं मुनिपं स्वदेशकुशलोदन्तं प्रसङ्गान्मुदा ।
श्रीरामानुजवैभवं बहुमुखं चा वेदयामासतुः
श्रुत्वैतादृश मिष्टमेव फलितं मेने च य स्तं भजे ॥ [२२]

शिष्यै स्साकं करिगिरिपतेर्मङ्गळाशासनं यः
कृत्वा रामावरजयमिनं प्रेक्ष्य दूराच्च तुष्टः ।
देवं भूयोप्यनमदभयं प्रार्थयन् स्वेष्टसिद्ध्यै
रङ्गास्थाने निजमतपरीरक्षणार्थं भजे तम् ॥ [२३]

श्रीराममिश्रगुरुराडुपदेशलब्ध-
गीतार्थसारसमुदीक्षणतो वितेने ।
गीतार्थसङ्ग्रहसमाख्यकृतिं प्रशस्ताम्
य स्तत्वनिश्चयचणः प्रणमाम्यहं तम् ॥ [२४]

प्रामाण्यमागमानां प्राज्ञंमन्यैर्विलोपितं जगति
प्रामाण्य मागमीयं पुनरप्य स्थापि येन तं वन्दे ॥ [२५]

पुरुरुषा पुरुषाः परुषोक्तिभिः पुरुषतत्वविवाद मकुर्वत ।
पुरुषनिर्णयमाह तदा च यः तमुपयामि गुरुं मुनियामुनम् ॥ [२६]

यदा लक्ष्मीतत्वे विविधकथका नैकमतयः
मिथो वादोन्मत्ता नयपथविदूरा स्समभवन्।
चतुश्श्लोक्या य स्तान् व्यजयत तदा निर्णयगिरा
सदा सेवे भक्त्या निखिलजननीं तं च यमिनम् ॥ [२७]

आत्मेश्वराद्ये प्रथिते च सिद्धी
संविन्मुखा सिद्धि रितीह तिस्रः ।
तत्वप्रबोधाय हि यो व्यतानीत्
प्रणौमि तं यामुन मद्वितीयम् ॥ [२८]

प्रत्नवावप्रयत्नलभ्य मुक्त्ययत्नदायिनम्
तत्वसार मद्वितीय मत्युदारभावदम् ।
स्तोत्ररत्ननामधेय मागमोक्तिभक्तिदम्
य श्चकार यामुनं त माश्रये कवीश्वरम् ॥ [२९]

स्मारं स्मारं गुरुं स्वं प्रथितमतिमता मुत्तमं राममिश्रम्
श्रीमद्रङ्गाधिनेतु स्सविध उपकृतं सर्वनिर्वाहशक्तम्।
श्रीमद्रामानुज चायतियतितिलकं भावयन् अन्त्यकाले
आकुञ्च्यात्माङ्गुलीर्यः समदिश दखिलं तं भजे यामुनेयम् ॥ [३०]

श्रीमद्यामुनसंयमीन्द्रसुगुणालङ्कारविद्योतिनीं
एतां त्रिंशत मादाराद्विरचितां ये कीर्तयन्त्यन्वहम् ।
गोपालेन गुरूत्तमाङ्घ्रिकमलास्वादैकलोलेन ते
विद्वांस स्सकलाभिनन्द्यचरिता भान्त्यात्मभाग्याधिकाः ॥ [३१]

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# आचार्य प्रभाव दशकम्

श्रीमते वेदान्तरामानुजमहादेशिकाय नमः

गुर्वनुग्राहकाः श्लोकाः तदनुग्राह्यकीर्तिताः ।
मङ्गळं श्लोकपात्राय गुरवेऽस्तु सुमङ्गळम् ॥

वेदोत्तंसवचोनिधेः गुणनिधेः वेदावतंसाञ्चित
श्रीरामानुजदेशिकोत्तममणेः गाधासुधास्वादिनः ।
संन्यासाश्रमधर्मभर्मवपुषोऽनुष्ठाननिष्ठाजुषः
रङ्गक्षेत्रमुपेयुषो यतिपतेः पादाम्बुजं सन्नुमः ॥

पायात् अपायात् गुरुपुङ्गवस्य पादूयुगं स्वादुफलप्रदायि ।
ददाति यत् स्वेप्सितमात्मबोधं तथेह निर्बाधसुजीवनं च ॥

अलं मदकृतं मन्तुं क्षन्तुं गुरुपदद्वयम् ।
स्वान्तं त्वद्दास्यसाम्राज्ये महत्पद्मभीप्सति ॥

श्रुत्यन्तरामानुजयोगिवर्य त्वत्पादसेवोच्चपदादरोऽपि ।
नीचोऽयमित्येव तदन्यवृत्तिष्वत्यादरं मेऽद्य निराकुरुष्व ॥

धन्या ध्यानपरा नरा इह सदा मान्यैकसङ्कीर्तितं
हंसं तं निगमावतंस मपरं रामानुजं देशिकम् ।
दैवद्राविडवाग्विलास ममलं हृद्यं हृदि ध्यायत
वाचा कीर्तयतेह वो भयहरं क्षेमङ्करं सादरम् ॥

माता तातो तथा नेता नेतो त्रातास्ति तं विना ।
इति श्रये संयमिनं गुरुं श्रुत्यन्तलक्ष्मणम् ॥

अगणितसुखदुःखान्यन्वभूवं कथञ्चित्
  यतितिलक ! निधेहि त्वं दृशं मादृशे ते ।
कलयतु कुशलं मे सत्यसङ्कल्प ! योगिन् !
  निगमशिखररामानूद्भवाचार्यवर्यं ॥

श्रीभाष्ये वा श्रुतिशिरसि वा श्रीरहस्यत्रयाढ्ये सारे
  गीतासु च भगवतः स्वीयमत्यातिसूक्ष्मान् ।
दिव्यान् अर्थान् विबुधमहितान् स्वानुभूत्येकसिद्धान्
  पायं पायं यतिपतिरयं पाययन् स्तात् शताब्दान् ॥

रङ्गलक्ष्मीरङ्गनाथयुगाय परमात्मने ।
मङ्गलं श्रीत्रयीचूडालक्ष्मणाय सुमङ्गलम्॥

विद्यावार्धिर्महात्मा सकलगुणनिधिर्योगिराट् हर्षवर्षी
  श्रीमद्वेदान्तरामानुजयतिनृपतिः स्तात् शताब्दान् दृढात्मा ।
षट्सप्तत्यब्दपूर्तेर्मह इह भविता ह्याश्रिताशातिशायी-
  त्येतत् सर्वत्र लोके प्रकटयति महान् दुन्दुभिर्घोषणेन॥

दुन्दुभिवत्सरसदृशं त्वसदृशनिनदात् रसादर्शम् ।
दुन्दुभिरिङ्गितवचसां गुरुमुखविमुचां न्यदर्शि सादृश्यम्॥

# திருநாள்பாட்டு

மேதினி மீது யதீந்திரன் தம்மருளீண்டென மீண்டிடுநாள்

மாசறுசோதி மயக்கமறுந்திட மண்ணிடை வந்திடுநாள்

தீதறு தேசிகர் நல்லுரை ஓர்ந்திடத் தேசமுயர்ந்திடு நாள்

தேவரும் மானிடராக அவாவுறு தேசு நிறைந்திடு நாள்

ஓதரும் வேதமனைத்து முரைத்திடுமோரொளி தோன்றியநாள்

வேதமுடிப் பேராசிரியன் பினும் வாழ்ந்திட வந்திடுநாள்

மேதகு சீர் சீர்வாஸ யதீந்திரர் மேதினி தோன்றிய நாள்

ஆசறு மாவணித் திங்களமைந்த தோருத்திரத் திருநாளே.

## மைசூர் ஆண்டவன் மங்களம்

आचार ज्ञान वैरग्य निधये नित्यबन्धवे ।
श्रीवासाख्याय गुरवे नमोवाकमधीमहे ॥ [१]

श्रीनिवास गुरुप्राप्त शास्त्र सार्वज्ञ शालिने ।
श्रीवासलक्ष्णाख्याय गुरवे भूरि मङ्गलम् ॥ [२]

श्रीमत्सारबुभुत्सूनां बोधाय प्रियकाम्यया।
तत्सारसारसंधात्रे सारज्ञायास्तु मङ्गलम् ॥ [३]

निवासतरवे नित्यं भक्तानां नित्यबन्दवे ।
निर्णीतपरमार्थय नित्यं भवतु मङ्गलम् ॥ [४]

वादिसिह्मगुरुप्रोक्त पादूस्तोत्र प्रवेशिनाम् ।
हिताय भाषाव्याख्यान दायकायास्तु मङ्गलम् ॥ [५]

सनकादिसमानाय सन्घात्रे स्तोत्रवारिधेः ।
अजातशत्रवे सर्व प्रियच्चित्ताय मङ्गलम् ॥ [६]

राजत्फाललसत्पुण्ट्र शोभिने शुद्धच्चेतसे ।
रसोक्तिपूर्णकृतये कविमुख्याय मङ्गलम् ॥ [७]

मानमेयरसज्ञाय मतानां मार्गदर्शिने ।
मातृकल्पाय शिष्याणां मानदायास्तु मङ्गलम् ॥ [८]

नुताय सर्वैस्सततं स्थितायाच्चारवर्त्मनि ।
मताय सर्वलोकानां नुतरामाय मङ्गलम् ॥ [९]

जगद्रक्षणदीक्षस्स रामानुजमुनिस्स्वयम् ।
यद्रूपेणावतीर्णोऽत्र तस्मै भवतु मङ्गलम् ॥ [१०]

मुनये जितच्चित्ताय मुक्तिमार्ग प्रदर्शिने ।
त्रिदण्डविलस्दोस्स्थ च्चतुस्सूत्राय मङ्गलम् ॥ [११]

नयव्याकृति शास्त्राणां वेत्त्रे ज्ञानजितारये ।
मीमांसायुग्मपाथोधि मन्दायास्तु मङ्गलम् ॥ [१२]

ये मुक्तिकामा यस्यांघ्रिं प्राप्यापुः सर्वशेषिणाम् ।
सदा संतृप्तच्चित्ताय सर्वज्ञायास्तु मङ्गलम् ॥ [१३]

नाधिकंब्रुवते नातिन्यून्वाच्चे नयाक्षिणे ।
सर्वलोकप्रियायास्तु सदा पूर्णाय मङ्गलम् ॥ [१४]

मकारार्थ हितायैवावतीर्णाय महात्मने ।
श्रीवासलक्ष्मणाख्याय दयावारिधये नमः ॥ [१५]